नं० ६१२-घ

प०५६

शुद्धिविवेकः (धर्मशास्त्रम्)

पत्राणि ५६ (सम्पूर्णम्)

नं० ६१२-घ

कर्त्ता रुद्रधरः; लिपिकः शिवचन्द गुज्जरः

संवत् १९६३

शुद्धिविवेकः ५५

श्री॥ ॥ स्वस्ति श्रीगणेशाय नमः॥ ॐ॥ हरतु दुरितजालं केशवस्यैकबाहुर्विपुलगलविलग्नः केशि-
नः संविपिष्टः॥ असुपवनमिवास्ये प्राशितुं संप्रवृद्धः कुवलयदलनीलः पंचशीर्षो भुजंगः॥१॥ चिरंत-
॥१ नानेकनिबंधसिद्धसुसंवृतयानुजनतः स्फुटार्थः॥ नत्वा हरिं रुद्रधरेण सम्यक् वितन्यते शुद्धिविवेक ए-
षः॥२॥ संस्थे वरत्नाकरपारिजातमिताक्षराहारलतादयोन्ये॥ तथापि तत्रालसमानसानां भवेत्प्रमो-
दाय मम प्रयासः॥३॥ शुद्धिस्तावदखिलविहितकर्माधिकारापादको धर्मविशेषः॥ अशुद्धिस्तद्विरोधी
धर्मविशेष एव सपिंडजननादिनिमित्तकः॥ तत्राशुद्धिविगमसमयकथनेन शुद्धिर्विविच्यते॥ तत्र सपिंड-
जननादिज्ञाते शुद्धिहेतुः॥ तेन सपिंडादेर्जन्ममरणे वा वृत्तमस्ति न चाशौचप्रतियोगि न ज्ञायते॥ प्रतिग्रहा-
दिकर्त्तुर्ज्ञायते तेन दातृत्वस्य काशौचप्रतिग्रहादाने तद्दत्तभोजने च न दोषः॥ अपि दातृगृहीत्रोरस्मरनकेमलके-
तथा॥ अविज्ञातेन दोषः स्यात् श्राद्धादिषु कदाचन॥ विज्ञाते भोक्तुरेव स्यात् प्रायश्चित्तादिकं क्रमात्॥ ...यातः सा-
मान्यतश्चातुर्वर्ण्यस्य मृतकाशौचं॥ तत्र मनुः॥ शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः॥ वैश्यः पंचदशाहेन
शूद्रो मासेन शुध्यति॥ उशनस्तु रागे॥ शैवाशैवानां चतुर्थीतत्परत्वं वदन् दशकरः॥ वर्णशंकराः॥ ...शंकरो॥ अ- ॥वि
पदाहिवलतुरातो ॥

पकृष्टवर्णोत्कृष्टवर्णासु स्त्रीषु जाताः॥ तत्रापि विशेषमाह॥ बृहस्पतिः॥ दशाहेन सपिंडास्तु शुध्यंति प्रे
तसूतके॥ त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यंति गोत्रजाः॥ अत्र दशाहपदं स्वस्वजात्युक्ताशौचोपल
क्षणं॥ सपिंडास्सप्तपुरुषावधयः॥ स्ववंश्यास्सप्तपुरुषादनंतरं दशमपुरुषपावत्॥ सकुल्याः दशमपुरु
षादनंतरं जन्मनाम्नोरविज्ञाते अस्मत्कुलजा इत्येवज्ञानं गोत्रजाः॥ ज्ञायमाने जन्मनाम्नो
दशमपुरुषाधिकानां मरणजन्मनोपक्षिणी। पक्षिणी सपिंड इत्यनेनाऽवद्यते॥ तदत्रापि सर्वैक
वाक्यतयार्थः॥ ब्राह्मणः सपिंडे ब्राह्मणे मृते दशरात्रेण शुद्धिः॥ सकुल्ये मृते त्रिरात्रेण॥ तदूर्ध्वं ज्ञायमानज
न्मनामके कुलजे मृते पक्षिण्या॥ गोत्रजे स्नानमात्रेण शुद्धिः॥ क्षत्रियस्य सपिंडक्षत्रियमृते द
शाहेन शुद्धिः॥ सकुल्ये त्रिरात्रेण॥ तदूर्ध्वं पक्षिण्या॥ गोत्रजे स्नानमात्रेण॥ वैश्यस्य सपिंडे वैश्य
मृते पंचदशमात्रेण॥ अत्र च सर्वत्राहः॥ पदं रात्रिपदं अहोरात्रपदं ज्ञातव्यं॥ यदा रात्रौ संध्या
यां मरणजन्मनी भवतः॥ तदातीतदिनेनैव सहाहोरात्रो ग्राह्यः॥ यदाह कश्यपः॥ रात्रावेव
समुत्पन्ने मृते रजसि सूतके॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः॥ उदिते तु परस्यैना

॥अशु ०॥ रीगोदस्पतेरत्नः॥ जननं चाविपत्तिसेकोर्धीयस्याहस्तस्पर्शवरी॥ ॥अत्रोगिरा॥ यत्तु धेहनि कर्त्त
॥२॥ व्यः॥ संस्पर्शो ब्राह्मणस्य॥ पंचमेहनि कर्त्तव्यः संस्पर्शः क्षत्रियस्य हि॥ सप्तमेहनवित्तेपः वैश्य
2 स्य स्पर्शनं बुधैः॥ दशमेहनि शूद्रस्य कार्यं संस्पर्शनं बुधैः॥ ॥अत्रेदं तत्त्वं॥ सर्वाशौचस्य तत्त्वती
यस्य भागे ज्ञं जास्पर्शकर्त्तव्यः॥ तथाच देवलः॥ ॥अशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः॥
सद्यविद्धत्वविप्राणां यथाशास्त्रप्रदर्शनात्॥ एवसति ब्राह्मणादीनां दशाहादिभ्यो यन्न के भ्यो यद्
गोधिकस्य अपत्वमशौचस्य नस्संतरोक्तं॥ तद्गुणयुक्तगुणहीनविषयं बोद्धव्यं॥ ॥प्रयजननाशौचं॥
तत्रमनुः॥ जननेप्येवमेवस्यान्निपुणां शुद्धिमिच्छतां॥ सर्वेषां शावमाशौचं मातापित्रोस्तु सू
तकं॥ मातुर्वा सूतकं स्यादुरुपस्पृश्य पिता शुचिः॥ जननेपि जन्मन्यपि एवमेव मरणवद् शौच
दशाहादिव्यापकं भवति॥ ॥अयं विशेषः॥ शावमाशौचं मरणहेतुः कमस्पृश्यत्वं सर्वेषामशौच ॥वि
भागिनां सूतकं पुत्रावनिमित्तमं यत्तु नुरुपस्पृश्यत्वं मातापित्रोरेव॥ तत्रापि विशेषमाह मालवेति॥ ॥२

मातर्या

वा शब्द एव च कारार्थः ॥ मातुरेव सूतकं दशाहं व्यापकं ॥ अस्पृश्यत्वलक्षणं प्राहुः । उपस्पृश्य स्ना
त्वा पिता शुचिस्पृश्यो भवतीति ॥ अशौचमित्यनुवर्त्तमाने इति इंगताद्वल्लभ्युस्वीदित्य । एनंत्वः
शुची स्वरेत्यादिनो भजपदवद्धिः ॥ संवर्त्तः ॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ॥ मातुः शु
ध्यद्दशाहेन स्नानात्स्पर्शनं पितुः ॥ अंगिराः ॥ सूतके सूतकावर्ज्यं संस्पर्शं न दुष्यति ॥ संस्पर्शी सू
तिकायास्तु स्नानमेव विधीयते ॥ यदि तु जनकः पत्नीं संस्पर्शीं करोति ॥ तदा तस्यापि सूतकमस्पृ
श्यत्वं ॥ तथा च पाराशरः ॥ यदि पत्न्यां प्रसूतायां द्विजः संपर्कमिच्छति ॥ सूतकं तु भवेत्तस्य यदि वि
प्रः षडंगवित् ॥ षडंगविदपि विप्रः संपर्कं स्पर्शं करोति प्रसूतायाः पत्न्यास्तदा तस्य सूतकं दशा
हमस्पृश्यत्वं भवतीत्यर्थः ॥ अत्र संपर्को मिश्रगम इति व्याख्यानमयुक्तं ॥ मातुरेव सूतकं
तां स्पृशानस्य पितुर्नेतरे बान्धवा इति स्मृत्यन्तरैकमूलत्वात् ॥ ब्रह्मपुराणे ॥ सूतके तु मुखं दृष्ट्वा
जातस्य जनकः शुचिः ॥ कृत्वा सचैलं स्नानं तु शुद्धो भवति तत्क्षणात् ॥ अन्यास्तु मातरः स्नात्वा दशाहेऽसे

शु०॥ न व्रजति चेत्॥ सपिंडाश्चापि संस्पृश्याः संति सर्वेपि नित्यशः॥ अन्यां मातरं सपत्नी मातरः तद्गे-
॥२॥ हं न व्रजंति तद्गेहे हि गत्वा तां चेन्न स्पृशंति तदा शुद्धा एव स्नानं विनापि॥ एवं सपिंडा अपि॥ तत्स्प-
3 र्शे तु स्नानेन शुद्धिः॥ एवमेव हारलता॥ आचारेपि॥ अत्र स्त्रीजन्मनि स्नानानुपदेशात् पितुर-
पि स्नानं विनैव शुद्धिरिति बोध्यं॥ तथा॥ ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः॥ जातैः
स्पृश्या च संस्पृश्या त्रयोदशभिरेव च॥ यत्तु सूतिका सर्ववर्णानां दशरात्रेण शुध्यतीति॥ स्पृश्या-
प्यपि दशरात्रेण शुद्धिः॥ कल्पतरौ च तत्सा सच्छूद्रस्त्री विषये बोध्या॥ पैठीनसिः॥ सूतिकां पुत्र-
जननीं विंशतिरात्रेण स्नातां सर्वकर्माणि कारयेत्॥ अस्यार्थः॥ पुत्रे जाते प्रसूतिका विंशतिरात्र-
तीते कृतस्नानां पाकादि दैवार्थं अदैवार्थं कर्म कारयेत्॥ स्त्र्यपत्योत्पत्तौ मासेतीते सर्वकर्मा-
णि कारयेत्॥ अपत्यजननमरणाशौचयोर्नियमः॥ तत्र जाबालिः॥ संध्यां पंच महायज्ञा-
न्नैत्यकं स्मृतिकर्म च॥ तन्मध्ये हापयेत्तेषां दशाहांते पुनः क्रिया॥ नैत्यकं स्नानतर्पणादि तन्म- ॥वि०॥

पितृकर्म मासेन स्त्रीजनने इदं तु ब्राह्मणादि क विषयं ज्ञातव्यं वैधा ॥२॥

ध्येऽग्न्यशौचमध्ये हापयेत्॥ इत्यनेनादित्यर्थः॥ दशाहान्त इति शौचान्ते लक्षणं॥ तेनाशौचान्ते तत्कां
ङ्क्षालक्षणादीनां क्रियासंध्याकरणमित्यर्थः॥ मनुः॥ अथ यत्र दशाहा..निकुलस्यान्नं न भुज्यते॥
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते॥ अथ यत्र जनने मरणे दशाहानीत्यशौचं कालोप
लक्षणं॥ तेन दशाहानि तत्र शौचकालं व्याप्य कुलस्यासिद्धान्नं भोज्यमित्यर्थः॥ अत्र होमे विशेषमा
ह॥ छन्दोगपरिशिष्टे॥ कात्यायनः॥ सूतके कर्मणां त्यागः संध्यादीनां विधीयते॥ होमः श्रौते तु कर्तव्य
होमयेत शुष्कान्नेनापि वा फलैः॥ अकृतं हापयेत्...॥ स्मार्ते तदभावे कृताकृतं॥ कृतमोदनशक्त्वादि तंडुलादि कृ
९ ताकृतं॥ व्रीह्यादि चाकृतं प्रोक्तमिति ..त्रिधा बुधैः॥ अस्यार्थः॥ अशौचे संध्यादीनां विहितकर्मणां
त्यागः॥ अग्निमतां तु श्रौताग्नौ शुष्कान्नेनापि फलेन वा होमः कर्तव्यः॥ स्मार्ताग्नौ व्रीह्यादिना तंडुला
स्व दिना वा परद्वारा होमः कारयितव्यः॥ कृतमोदनसक्त्वादि परद्वारापि न हापयेत्॥ अत्र तंडुलादिपदेन माष
मुद्गादिग्रहणं॥ व्रीह्यादिपदेन यवगोधूमादीनां ग्रहणं॥ ओदनसक्त्वादीत्यादिपदेन लाजापोदकले कुला

ते

।।प्र० ११ ग्रहणं गतं न प्रतिग्रहो विशेषमाह॥ मनुः॥ जाते कुमारे तदहः कामं कुर्यात्प्रतिग्रहं॥ हिरण्यधान्यगोवा
॥४॥ सस्तिलान्नगुडसर्पिषां॥ संवत्सलिखितौ॥ कुमारप्रसवे नाड्यामच्छिन्नायां गुडतैलहिरण्यवस्त्रप्रावर
णगोधान्यप्रतिग्रहो न दोषः॥ तदहरित्येके गुर्वर्थं कर्म कुर्वतः॥ प्रावरणकंबलादिकं॥ आपस्तम्बः॥ पुत्रजन्म
नि नाडीछेदात्पूर्वं हिरण्यधान्यादि दद्यात्॥ दातुः प्रतिग्रहीतुश्च दोषो न भवति॥ गुर्वर्थं प्रतिग्रहीतुश्च नाडीछे
दनात्पूर्वं दनं तरमपि न दोषः॥ ब्रह्मपुराणे॥ देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां॥ आयांति तस्मात्तदहः
पुण्यं पूज्यं च सर्वदा॥ तत्र दद्यात्सुवर्णं च भूमिं गां तुरगं रथं॥ छत्रं छागं च माल्यं च शयनं चासनं गृहं॥
जातस्याङ्गे च नो दद्यात्पक्वान्नं जन्मनोऽपि॥ तदहः पुण्यपर्व च दिनं पुण्यमित्यर्थः॥ पुत्रोत्पत्तौ नाडी
छेदात्पूर्वं जातस्याङ्गमसिद्धान्नेन कर्त्तव्यं॥ एवं रूपे स्याङ्गेऽन्नवर्जनं पिंडदानादि दिनं स्त्रीति मर्त्यः ॥ स्वा
मिनाविति रत्नाकरः॥ मार्कंडेयपुराणे॥ षष्ठे ह्निरात्रियाजं तु जन्मादीना कारयेत्॥ रक्षणीयं तथा षष्ठी ॥वि०॥
नि शां तत्र विशेषतः॥ जन्मदानां षोडशमात्त्रयोदशमहि तारात्रियाजं कुर्यादित्यर्थः॥ १॥ ॥४॥

षष्ठीनिशां व्याध्यरक्षणीयं रक्षा कार्या । रक्षो धूपदीपशस्त्रादि सन्निधापनेनेत्यर्थः ॥ स्मार्त्तक्रिया
निवृत्तौ विशेषमाह ॥ शंखः ॥ दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च । प्रेतपिंडक्रियावर्ज्य
माशौचे विनिवर्त्तते । प्रेतपिंडदानादिवर्ज्यं सर्वदानमशौचे सति निवर्त्तत इत्यर्थः ॥ वस्तुविशेषे दोषा
भावमाह ॥ मरीचिः ॥ लवणे मधुमांसे च पुष्पमूलफलेषु च । शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु च ।
तैलौषध्याजिने चैव पक्वापक्वा स्वयंग्रहः ॥ पुण्येषु चैव सर्वेषु नाशौचं मृतसूतके ॥ पयःपदेन तक्रदुग्ध
पदंदध्यादि साहचर्यात्तु वाक्यान्तरानुरोधाच्च ॥ पक्वं सक्तुमोदकादि । अपक्वं तण्डुलादि । तत्स्वयंग्रहणमा
त्रं ॥ स्वाम्यनुज्ञया न दोषमावहतीत्यर्थः ॥ पक्वापक्वं तत्र स्वयंग्रह इत्यन्वेति न तु लवणादिभिरिति
अत एवमेव रत्नाकरस्वरसवन्तीपतौ ॥ तत्स्वयंग्रहग्रहणमाणमिति पूर्वप्रक्रांतस्य पक्वापक्वैकवच
नांतसर्वनाम्नाप्यवमदर्शनात् । तेन लवणादीनामशौचं द्वारा ग्रहणे दोषाभाव इति सिद्धं ॥ ॥
अथ वर्णानां विशेषेणाशौचं ॥ तत्र दक्षः ॥ सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ॥ षड्दशद्वादश

॥ सू०॥
॥५॥

सद्यस्नातेन २

शाख्यप द्वौ मासस्त्वेव च ॥ मरणांतं तथा च न्यद्दशापद्वास्तु सूतके ॥ उपन्यासक्रमे तौ तानुवक्ष्याम्यह
मशेषतः ॥ सूतकमशौचं तद्दशविधं भवति ॥ तत्र सद्यः शौचं स्नानमात्रेण यत्र शौचं भवति तत्स
द्यः शौचं स्नानमात्रमपनेयमशौचं । एकाह एकाहो रात्रिव्यापकं । एवं त्र्यहादयितं तत्कालव्याप
कमशौचं ॥ मरणांतमन्यदिति । जननमरणनिमित्तकादिभिन्नं मरणांतमन्यदशौचं दशमप्रित्य
र्थः ॥ तत्र सद्यः शौचमाह ॥ ज्ञत्वार्थतोऽपि जानाति वेदमंत्रैः समन्वितं । सकल्पं सरहस्यं च क्रियावां
श्चेन्न सूतकं ॥ अस्यार्थः ॥ यदि ज्ञत्वार्थतोऽर्थतश्च वेदं विजानाति सम्यक् सिद्धांतन्यायानुसारेण जा
नाति सकल्पः ॥ कल्पो ज्योतिष्टोमाद्यनुष्ठानपद्धतिः तत्सहितं ॥ मंत्रैः समन्वितं सिक्षाद्यपरंपन्चां
गसहितं सरहस्यं । रहस्यप्रतिपादकमीमांसादिनिर्णीतार्थसहितं जानाति । क्रियावान् स्ना
त्वाग्निहोत्रादिक्रियावान् संभवति । तदा सूतकं न भवति । तेन सद्यः शौचं भवतीत्यर्थः ॥ तथा च ।
एकाहाद्ब्राह्मणो शुध्येद्योऽग्निवेदसमन्वितः ॥ हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा ॥ अग्निस्त्रोत्रःस्मा ॥ वि०॥
र्तः ॥५॥

तत्र बृहस्पतिः

र्त्तस्य वेदः सांगो ज्ञातार्थस्य ब्राह्मणस्यात्रा विहितक्रियैकदेशवान् विवाहितः ॥ तस्य एकाहः ॥
हीनः श्रौताग्निहीनः स्मार्त्ताग्निमान् सांगसार्थज्ञानसंपूर्णवेदवान् ॥ तस्य त्र्यहः शौचं ॥ हीनं तरो
ऽग्निद्वयहीनं सांगसंपूर्णवेदवान् तस्य चतुरहो शौचकालः वक्तव्यः ॥ त्रिरात्रेण विशुद्ध्येत विप्रो वे
दाग्निसंयुतः ॥ पंचाहेनाग्निहीनस्तु दशाहाद् ब्राह्मणब्रुवः तत्राग्निर्स्मार्त्तः ॥ तद्वतो वेदज्ञस्य त्र्यहः
पारि
। अग्निद्वयहीनस्य सर्ववेदाभिज्ञस्य कृत्स्नवेदाध्यायिनः पंचाहः ॥ शेषादग्निद्वयहीनस्य वेदैक
देशाध्यायिनः षडहः ॥ अत्र च वाक्याद्येतुल्यत्वात् याग्निद्वययुतस्य विज्ञातार्थकृत्स्नवेदव
तः सकलविहितक्रियावत एकाहः ॥ तथाग्निद्वययुतस्य वेदस्पृन्यस्य त्र्यहः ॥ ब्राह्मणब्रुवस्य
दशाहः ॥ ब्राह्मणस्य परिभाषितो व्यासेन ॥ गर्भाधानादिभिर्युक्तः तथोपनयनेन च ॥ न कर्मकृन्न
चाधीते स भवेद् ब्राह्मणब्रुवः ॥ सर्वैकवाक्यतया तदयमर्थः ॥ सांगसार्थकृत्स्नज्ञानवेदवतोऽग्निद्वय
युतस्य सकलविहितक्रियावतो विप्रस्य सद्यःशौचं ॥ अविज्ञातार्थसांगवेदवतोऽग्निद्वययुतस्य

ब्रुव

त्र्यहः

॥शु०॥ विहितैकदेशक्रियावतो विप्रस्य सद्यःशौचं विज्ञातार्थसांगवेदवताग्निद्वययुतस्य विहितैकदेश
॥६॥ क्रियावतोपि एकाहः॥ श्रौताग्निहीनस्य स्मार्ताग्निमतः सांगसार्थज्ञानवेदवतस्त्र्यहः॥ वेदमा
त्रस्याग्निद्वयवतस्त्र्यहः॥ सार्थकृत्स्नवेदाध्यायिनोग्निद्वयहीनस्य चतुरहः॥ अंगमात्रस्य कृत्स्न
6 वेदाध्यायिनोग्निद्वययुतस्य पंचाहः॥ वेदैकदेशाध्यायिनोग्निद्वयहीनस्य षडहः॥ ब्राह्मणब्रुवस्य द
शाह इति। पाराशरः॥ संपर्काद्दुष्यते विप्रो जनने मरणे तथा। संपर्काद्विनिवृत्तानां न प्रेतं नैव सूतकं॥ प्रेत
मरणशौचमित्यर्थः। अत्र च सर्वे वैते यथोक्ताः स्वघशौचा भवंति यदि का अपकर्षपक्षाः सपिंडान्तराणां म
शौचिनां संपर्काभावे सति बोध्याः। संपर्के त्वाते बामिवद्दशाहाशौचं भवति। आचारेपि तथा॥ सं
संपर्कश्चात्र एकत्रासनशयनभोजनस्पर्शो विवक्षितः॥ इति रत्नाकरः॥ क्षत्रियो। वैश्यो यो ह्यग्नि
मतो दृशौ ह द्वादशाहो। तथा च पाराशरः॥ क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः॥ तथैव द्वा ॥वि०॥
दशाहेन वैश्यः शुद्धिमवाप्नुयात्॥ ... त्रस्यापि विशेषमाह॥ याज्ञवल्क्यः॥ क्षत्रियस्य द्वादशाहानि ॥६॥

अतिमात्र

विंशां पंचदशैव तु ॥ त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः ॥ न्यायवर्त्तिनः स्वद्विजादिशुश्रूषापंचयज्ञादिशूद्रविहि-
तक्रियावतः ॥ शूद्रस्य पंचदशाहाशौचं ॥ सर्वं चैतदशौचसंकोचविधानं तिपतेष्वेव हेमादिविधिषु वचनेषु ॥ ननु
सर्वेषु दानान्नभोजनप्रतिग्रहादिषु ॥ तेषु कर्त्तव्येषु ब्राह्मणादीनां दशाहादिकं संपूर्णाशौचमेवानुवर्त्तत इति मिता-
क्षरादयः ॥ तथाहि ॥ दशाहं शावमाशौचमिति सामान्यप्राप्तदशाहबाधपुरःसरमेव एकाहाद्ब्राह्मणः शुद्ध्येदित्यादिविधा-
यकं भवति ॥ बाधकस्य चानुपपत्तिनिबंधकत्वात्तावदबाधितेनुपपत्तिप्रशमेन भवति तावदनेन बाधितव्यं ॥ अतः किंपद-
नेन बाधितव्यमित्याकांक्षायामपेक्षितविशेषसमर्पणक्षमस्याग्नेर्वेदसमन्वितः इत्यादिवाक्यविशेषस्य दर्शनादग्नि-
होत्रादौ कर्म्मणि स्वाध्यायशौचं व्यवतिष्ठते ॥ नु पुनर्दानादावपि ॥ तथा च ब्राह्मणस्य स्वाध्यायानिवृत्त्यर्थं सद्यः शौचमित्ये-
वमादिभिर्मन्वादिवचनैरविरोधवाक्यतां भवति ॥ तथा च ॥ उभयत्र दशाहानि कुलस्यान्नं न भुंजति इति दशाहपर्यंतं भोजना-
दिकं प्रतिषेधयाद्भिः यमादिवचनैरविरोधोसिद्धतीत्यतः क्वचित्कर्मवेदमशौचसंकोचविधानं न पुनः संध्याव्यवहारा- सर्व
दिगोचरमित्यलमतिप्रपंचेनेति मिताक्षराहारलताकारोपि अयं च शौचसंकोचो होमाध्ययनार्थमेव न तु संध्यापंचम-
हायज्ञान्नैत्यकं स्मार्त्तकर्म च ॥ तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥ उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ॥ १ ॥

।।शु०।।
।।७।।
7

दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते । इति जाबालवचनाभ्यां शिष्टानां संध्यापंचमहायज्ञाग्नित्रिकाग्रहण
मार्जनप्राणायामतर्पणयुक्तप्राधान्यक्रियारूपस्नानात्मकनैत्यकस्मृतिकर्म्म कुलान्नभोजनदानप्रतिग्रहकाम्यहो
मस्वाध्यायानामनुष्ठार्थः ।। अनेकवचनविरोधात् अतो वेदाध्ययनसंयोगादिनाहृत एकाहत्र्यहादभिः सर्वाशौचवि
निवृत्तिरित्यव्यामोह एवेत्याह ।। पारस्करः ।। एतद्व्याख्याता हरिहरमिश्रोप्येवमाह । एवं च सति आचार एवाशरणं
पावन्नावाशौचं दशमादहः ।। व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा क्रियाहीनस्य मूर्खस्य स्त्रीजितः ।। व्यसनासक्त स्याविशेषतः
चित्तस्य पराधीनस्य नित्यशः । श्राद्धत्यागविहीनस्य भस्मान्तं सूतकं भवेत् ।। कदर्यो ऽत्र देवलेन परिभाषितः ।। आत्मा
नं धर्मकृत्यं च पुत्रदारांश्च पीडयन् । लोभाद्यः संचिनोत्यर्थान् स कदर्य इति स्मृतः ।। अत्र सर्वदेति प्रत्येकमभि
संबध्यते । तेन सर्वदा ऋणग्रस्तस्य मरणान्तमशौचं भवतीत्यादिरर्थ इत्युक्तं यज्ञतिरत्नाकरः ।। व्याधितस्य कर्मासामर्थ्य ।।वि०।।
पादकव्याधिमतः ।। ऋणग्रस्तस्यानित्याधानिकौ सेवितस्य क्रियाहीनस्य इदं च दर्शनं तत्त्वे नोपपन्नं । मूर्खस्य गायत्री ।।७।।
रहितस्य स्त्रीजितस्य भार्यावशगस्य गुरुनिर्भर्त्सकस्य व्यसनासक्तचित्तस्य संध्याकौलेपि कार्यगताचित्तस्य पराधीनस्य
…नादिक्रियाहीनस्य २

श्राद्धकालेऽप्यनापन्नचित्तस्य श्रद्धात्यागविहीनस्य श्राद्धावेदबोधितेषु इदमपि यमेवेति निश्चयः॥ श्राद्ध
स्याजोत्रावस्यक श्राद्धादिनाऽपारहितस्य सर्वदेति प्रत्येकमभिसंबध्यते। तेन सर्वदा व्याधितादेर्नाशौचं। नि
वृत्तिः प्रायश्चित्ते। तरकर्मणि अधिकार इति शुद्धिप्रदीपः। इदं वाशौचं जननमरणनिमित्तिकाद्भिन्नमेव दशमं॥
अलपुराणे॥ अन्यत्सर्वा गृहे यस्य भार्यास्यात्तस्य नित्यशः। अशौचं सर्वकार्येषु गेहे भवति सर्वदा॥ दानं प्रति
ग्रहो होमः सर्वं तस्य वृथा भवेत्। गेहे इत्युपादानात् यस्य गृहं हस्तकारिणी। अन्यत्सर्वा भार्या भवति तस्य अ
त्पणादेः सर्वस्य सर्वदाशौचं भवतीति॥ एवमेव रजोकारणत्वः। अंशश्च। हीनवर्णा तु या नारी प्रमादात् प्रसवं व्रजेत्।
प्रसवे मरणे तज्जमशौचं नोपशाम्यति। हीनवर्णा शूद्रा प्रमादात् अज्ञानात् यतः कृतसंगमात् तेनायमर्थः। अपरणी
यघत्तमवर्णब्राह्मणकृतासंगमात्प्रसूतायास्तदात्प्रसवमरणयोर्जनेर्यस्य यावज्जीवमशौचमित्यर्थः॥ अ
थाशौचसंकरः॥ तत्र कूर्मपुराणे॥ अशौचानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी। मरणोत्पत्तियोगे तु गरीयो मर
णं भवेत्॥ अघानामशौचानां विषमकालव्यापकानां यौगपद्ये एकस्मिन्नस्त्यपरोनिपाते। आद्ये कृते दिनप्र

र्भिर्दे ३

धर्म

॥शु०॥ पक्षे नाशौचेनातीतेन शुद्धिस्तेषा ॥ अस्यापवादमाह ॥ मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति जनना
॥८॥ मरणाशौचं संकरे मरणाशौचमल्पकालव्यापकमपि गरीयः । तेन जननाशौचमध्ये मरणाभिपातक
स्य चः शौचाद्यशौचान्तरे पतिपाते नैव जननाशौचं बाध्यते ॥ सजातीयेस्समानव्यापके व्यवस्थामाह ॥ व दिन
डलपुराणे ॥ आद्यं भागद्वये यावत् सूतकस्य तु सूतके । द्वितीये पतिते चाद्यात् सूतकाच्छुद्धिरिष्यते ॥ अन्त्ये
ऊर्द्ध्वं द्वितीयात् सूतकं तावच्छुचिस्मृता ॥ एवमेव विचार्यस्यात् मृतके मृतकान्तरे ॥ अत्र च तु शुद्धिविषमकाशौचका
लस्य आद्यभागद्वये यदि समानदिनव्यापकं सजातीयमशौचान्तरमापपतितं तदा पूर्वाशौचापगमेनैव शुद्धिः ॥
अग्रिमभागद्वये अशौचान्तरपनिपाते अग्रिमाशौचव्यपगमनेन शुद्धिः । नत्राशौचान्तिनदिने आशौचान्तरो
पनिपाते विशेषमाह ॥ विष्णुः ॥ रात्रिशेषे दिनद्वयेन प्रातःस्नाते दिनत्रयेणेति । रात्रिशब्दोऽहोरात्रपरः । रात्रेः श
हो रात्रः शेषो यत्र तत्र द्वात्रिंशोधमशौचं तस्मिन्नशौचे अशौचान्तरोपनिपाते । दिनद्वयेन शुद्धिः ॥ अवशि
ष्टाऽहोरात्रादधिकेन दिनद्वयेन शुद्धिः ॥ यदि त्वाशौचान्तादिने जन्म समं दिनद्वयं स्यात्तदा एकेन्द्रीय वं ॥वि०॥
॥८॥

कृत्यात् । तदप्यसमर्थः ॥ अशौचांतिमेऽहोरात्रे यद्यसंपूर्णाशौचमापतति तदा पूर्वाशौचांतादेकेन
दिनद्वयेन शुद्धिरिति प्रभाते ऽशौचाहोरात्राशेषे सूर्योदयात्प्रागरुणप्रकाशे वृत्ते संपूर्णाशौचांतरो
पनिपाते सूर्योदयात्परं तन्तरं दिनत्रयेण शुद्धिः अत्र च यदि दशरात्रासन्निपाते तु राद्यं दशरात्रमशौ
चमित्यादिवाक्ये न परिशेषेण च संपूर्णसमानजातीयाशौचनिपाते व्यवस्था विज्ञापनो । तथा हि ॥ ५ गतीका
ऽल्पदिनव्यापकानां समानजातीयानां बाध्यत्वविधानात् विजातीयानां जननाशौचानामल्पदिनव्याप
केनापि मरणाशौचेन बाध्यत्वविधानात् पारिशेष्येण बाध्यं । समकालव्यापकं सजातीयं यन्नाशौचं तद्यं निपाते त
न्त्रैयं व्यवस्था विषमदिनव्यापकयोर्विजातीययोर्विजातीयोर्नेयं व्यवस्था नन्वत्रापि सैव व्यवस्थेति एवमपि
वरत्नाकरादयः । असंपूर्णाशौचानां समकालव्यापकानां यौगपद्ये तन्त्रेणैव शुद्धिः पूर्वव्यवस्थायाः संपू
र्णाशौचविषयत्वात् । वर्द्धितव्यूहाशौचेऽप्यहाशौचेऽपि संपूर्णाशौचांतरं यदि निपतति तदा व्यहत्र्यहप्रयो
र्लघुत्वात्तद्गुरूणामाऽडिमाशौचापगमे नैव शुद्धिरिति प्रतिभाति । देवलः ॥ परतः परतः शुद्धिरघवृद्धौ

॥श्रु०॥ विधीयते॥ स्याच्चेत्पंचतमादन्हः पूर्वेणाप्यनुशिष्यते॥ अस्यार्थः॥ एकस्मिन्नशौचे सति तच्छेषादनासमाप्य
॥९॥ शौचांतरोपनिपाते पंचतमादन्हः परतः परेणचेत्स्यात् द्यवद्धिः तदा परतः परेण संपूर्णाशौचेनातीते नशुद्धिः॥
९ पूर्वेणाप्यनुशिष्यत इति पंचतमादन्हः पूर्वेणानाद्यशाशौचांतरोपनिपाते पूर्वेणैवाशौचेन व्यपगच्छेत्तच्छुद्धिः॥
एवं चैतद्वाक्यं ब्रह्मपुराणीयवाक्यसमानार्थकमेवेति मंतव्यं॥ कूर्मपुराणे॥ अथ चेद्वृद्धिमदाशौचमध्ये चेत्तेन शु
ध्यति॥ अथ चेत्पंचमीरात्रिमतीत्य परो भवेत्॥ अर्द्धप्रथमाशौचादनंतरमपि चेद्वृद्धिमदाशौचं भवति। तदा ते
न प्रथमेनैव शुद्धिः॥ अथ चेत्पंचमीरात्रिमतीत्य भवेत्तदा परतः परेण शुद्धिरित्यर्थः॥ एवं ब्रह्मपुराणकू
र्मपुराणदेवलवाक्यैकवाक्यतया विष्णुवाक्यं संपूर्णाशौचप्रथमाशौचद्विविषयः स्मृत्यपनीयते। यदाह वि
ष्णुः जननाशौचमध्ये यद्यपरं जननं स्यात्तदा पूर्वाशौचापगमे न शुद्धिः॥ रात्रिशेषे दिनद्वयेन प्रभाते दिन
त्रयेण मरणाशौचमध्ये ज्ञातिमरणेऽप्येवं॥ रात्रिशेषद्यन्यादि पूर्वमेव व्याख्यातं॥ बौधायनः॥ जननमरणयोः स ॥वि०॥
न्निपाते समाने दशरात्रे॥ अथ यद्यादिदशरात्रे संनिपातेषु रात्रेषु दशरात्रशौचमानवमाद्दिवसात्॥ रामः॥ ॥९॥

समानेएकस्मिन्नदिवसे जननेजननान्नान्तरस्यमरणान्तरस्यसन्निपाते दशरात्रएवंनत्वनं नाधिकमशौ
चंव्यवहर्त्तव्यं॥ दिनांतरे ऽज्ञानवशाद्दिवसात् यदिने वाधके नापेक्ष्यते एवमेववाक्यार्थारविशेषोप्युक्तः। ऽत्र
प्रकरणे पंचमपदं संपूर्णाशौचाद्युपलक्षकं॥ नवमपदं संपूर्णाशौचोपान्त्यदिनपरं। दशरात्रपदं संपूर्णाशौचोप
लक्षकं॥ पम॥ ऽघवद्धवशौचनुपश्चिमेन समापयेत्। एतदसंपूर्णसौचानां सन्निपाते ज्ञेयं॥ लघुहारीतः॥
सूतके मृतकं चेत्स्यान्मृतके सूतके तथा मृतकेन सूतकं गच्छेन्नेतरं सूतकेन तु॥ तदेवाव्यवस्था॥ दशा
हाशौचे पंचमादिनपर्यतं द्वितीयेऽप्यशौचे सति ऽप्राक्तिमाशौचव्यपगमेन शुद्धिः॥ दशादिनसंपूर्णाशौचा
न्तरे मदिनद्वयेन शुद्धिः॥ दशमदिनरात्रिपाश्चे ऽप्यरुणोदयवेलायां पूर्णाशौचांतरोपनिपाते सूर्योदयानन्तरे
यामत्रिरात्रेणएवं त्रिपर्वेश्चपद्धजाणां संपूर्णास्वल्पाशौचद्वर्वोर्द्वसमानदिनव्यापकमशौचात्तरयदिनिप
तितन्तदाद्रूर्वाशैाचाव्यपगमेन शुद्धिः अल्पिमाद्धि ऽप्रक्तिमाशौचाव्यपगमेन शुद्धिः॥ ऽअशौचांतदिने ऽप्यशौचां
तरोपनिपाते सर्वेषांतदिनानंतरदिनद्वयेन शुद्धिः॥ एवमशौचांतदिनशेषे प्रभातकाले ऽप्यशौचांतरोपनिपाते

॥शु०॥ ऽप्याधिक्येन दिनत्रयेण शुद्धिः ॥ अपत्यस्य संपूर्णाशौचे समकालशौचान्तरोपनिपाते ऽग्रिमाशौच
॥१०॥ व्यपगमेन शुद्धिः ॥ सूतकाभ्यन्तरे मरणोपनिपाते मरणे वा सति सूतकोपनिपाते मरणाशौचव्यपग
10 मेनैव शुद्धिः ॥ एवं चाकुलप्रयुक्ताशौचेऽव्यवस्था। पुत्रस्त्रीणां ब्रह्मवनितिमित्तमशौचं न तत्प्रातस्विकं त
दन्येन बाध्यते ॥ तेन स्त्रीणां पतिमरणेपि पुत्रजन्मनि विंशतिदिनेभ्यः ऊर्द्ध्वं स्त्रीजन्मनि मासादूर्द्ध्वमा
ध्याचद्दर्शपाकादिकर्मणि चाधिकारः ॥ एवमेव ब्रह्मचारिकव्यवहारः ॥ अत्रापि पित्रादिमरणेऽशौचा
न्तरोपनिपाते विशेषो दर्शितो हारलताभिमतादाराभ्यासरल्लोकारादिशुदर्शनाभावादुपेक्षितः ॥ अथ विदेश
स्थाशौचं ॥ तत्र मनुः ॥ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं । यच्छेषं दशरात्रस्य तावदेवाशुचि
र्भवेत् ॥ अतिक्रान्ते दशाहे नाविरात्रमशुचिर्भवेत् । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥ यद्दे
शमरणे तद्दिने वा ज्ञाने स्नानान्नाम विदेशस्थस्तत्र विगतं विनश्यमानि र्दशं । व्यतीतदशाहजः शुरूषं ॥वि०॥
शृणुयात्स दशरात्रस्य यच्छेषं अवशिष्टं तावदेवाशुचिर्भवेत् ॥ अतिक्रान्ते अतीते दशाहे त्रिरात्रम ॥२०॥

३५

शुचिर्भवेत्॥ संवत्सरे त्वतिक्रान्तेऽप उपस्पृश्यैव स्नात्वैव विशुध्यति। अत्र च निर्दशमिति दशाहादूः सं
पूर्णाशौचोपलक्षकः दशरात्रदशाहशब्दावपि संपूर्णाशौचोपलक्षकौ। तेनायमर्थः॥ विदेशस्थः सपिंडम
रणश्रवणे ऽशौचकालानपगमे यावदवशिष्टमशौचकालस्य तावदेवाशौचं चतुर्भिः वर्णैः कर्तव्यं। अतिक्रां
ते तु संपूर्णाशौचकाले त्रिरात्रमशौचं कर्तव्यं। वर्षानंतरं सपिंडमरणश्रवणे स्नानमात्रेण शुद्धिः॥ एवं च तदेक
वाक्यतया स्वे स्वेऽहनि व्यतीते तु त्रिरात्रमशुचिर्भवेदित्यत्र स्वस्वाहपदं चातुर्वर्ण्यसंपूर्णाशौचकालपरमेव तेन
न त्रिरात्राविशेषशौचेत्यर्थः स्वाशौचकाले व्यतीते ज्ञात्वा मरणश्रवणेऽशौचाभावः। यदि तु स्वे स्वेऽहनि ति यस्य जा
वान्तशौचकालस्य इति क्रमे त्रिरात्रयविशेषबलेवेन्यर्थः स्यात्। एवं च सति न्यायसिद्धः। आशौचिकस्याशौचातिक्रमे ति त्र्यहाशौ
चापकर्षः साधु समर्थितः स्यात्। तस्मादसंपूर्णाशौचे त्र्यहादूर्ध्वमतीते स्नानोदक एव। तथा च याज्ञवल्क्यः॥ प्रोषिते
कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिरिति। पूर्णेऽशौचकाले इत्यर्थः। अत्रोदकदाने न स्नानमप्यात्रा। क्षिप्यते। प्रेतोद
कदानस्य सर्वत्र स्नानपूर्वकत्वात्॥ मनुः॥ निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो

॥श्रु०॥ भवति मानवः॥ अत्र निर्दिशं विः क्रांताशौचकालमित्यर्थः॥ तेनैतदपि त्रिरात्राशौचातिक्रमविषयकं बोध-
॥११॥ व्यं॥ सपिंडमरणे दशाहानंतरं श्रवणे विशेषमाह। गौतमः॥ श्रुत्वा चोर्द्ध्वं दशम्याः पक्षिणीति। दशम्या अशौचां-
॥ तरात्रे ऊर्द्ध्वं सपिंडमरणं श्रुत्वा पक्षिणी अशौचकालः गुरुकस्य भवति। आजानिवर्त्मानाह बृहन्मनुः। निशि पक्षि-
णी॥ आजानिवर्त्मानदिनद्वयसहिता रात्रिरित्यत्र पूर्वापररात्रिसहितं दिनं वा। देवलः॥ अशौचाहःस्वतीं-
तेषु बंधुश्चेदुपलभ्यतः। तत्र त्रिरात्रमाशुच्यं भवेत्संवत्सरांतरे। ऊर्द्ध्वं संवत्सराद्ज्ञाते श्रूयते चेत्ततः स्वकैः॥
भवेदेकाहमेवात्र तत्र संन्यासिनो न तु॥ नाशुच्यं प्रशवस्यास्ति व्यतीतेषु दिनेष्वपि॥ तत्र गौतमोक्तपक्षिणी सं-
वत्सराद्धादूर्द्ध्वं भवतीत्युक्ते॥ तत्पूर्वं देवलेन त्रिरात्राभिधानात्॥ देवलोक्तएकाहस्तदुपरिमासत्रयं भवतीत्येते-
न दंज सर्वैकवाक्यतयार्थः॥ अनतीताशौचकाले यदि तु सपिंडमरणं विदेशस्थो श्रूयते तदा यावदवशिष्ट-
मशौचकालस्य तावदशौचं कर्त्तव्यं। यदि तु संकरणोशौचस्य काले द्वितीये बहुष्वावस्य रात्रे सपिंडमरणं श्रूयते
तदा त्रिरात्रं॥ तदूर्द्ध्वं नवममासपर्यंतं पक्षिणी। तदूर्द्ध्वं वर्षं यावदेकमहोरात्रमशौचं॥ वर्षानंतरं स्नानमेवोदकं च ॥वि०
॥११॥

नं च॥ अपहाशौचावती ते सर्वदैव स्नानोदकदाने मात्रं। जननाशौचकालेऽपतीतेऽस्त्रवणे सर्वदाऽप्यशौचाभावः
अत्र पित्रादीनां विदेशस्थानां मरणश्रवणे मिताक्षराहारलतानाम्यां विशेषोऽतिरिक्ततः सन्तुरन्तोकरादिभिरलिखित
न्वादुवेद्दितः॥ महानद्यादिव्यवहितदेशान्तरमृतस्य मरणश्रवणे सद्यःशौचं। तथा च पैठीनसिः। देशान्तरमृतस्य सद्यः
शौचं। अत्र देशान्तरं परिभाषितं। तत्र वृहस्पतिः। देशान्तरं वदन्त्येके षष्टियोजनमायतं। चत्वारिंशद्वदन्त्येके त्रिंशदेके तन्
थैव च। वृद्धमनुरप्याह। वाचो यत्र विभिद्यन्ते गिरिर्वा व्यवधायकः। महानद्यन्तरं यत्र तद्देशान्तरमुच्यते। देशनदीभेदान्नि तरं
कटेपि भवेदन्तरं। तनुदेशान्तरे प्रोक्तं स्वयमेव स्वयंभुवा। दशरात्रेण वार्ता यत्र न श्रूयतेऽथवा। अत्र नानाकल्पेषु नव्यगत्याऽन
व्यवस्थापः॥ तस्माद्व्यवस्थाप्यतेऽत्र सर्जितस्त्रावत् षष्टियोजनानंतरं यत्र देशान्तरं यत्र चत्वारिंशद्योजनानन्तरं त्रिंशद्योजनान
न्तरस्य देशान्तरत्वमुक्तं। न च बाधे दोषः गिर्यादिव्यवधाने योजनानियमाभावं दर्शयितुं तेनाप्यनर्थः षाष्टियोजनाभ्यंतरेपि यत्र भा षा
भेदो गिरिमहानदीव्यवधानं वास्ति। तत्र तावनैव देशान्तरमनु योजनानियमापेक्षा। एतद्विषयमेव वृद्धमनुवचनं तद्वाक्य
मेव बध्नोति स्मा। देशानामनदीभेदादिनागिर्यादिव्यवधानाभावे तु नियमार्थमाह। दशरात्रेणेत्यादि। तेन गिर्यादिव्यवधाना
भावे यत्र स्यावार्त्ता दशाहाभ्यंतरे न श्रूयते तद्देशान्तरं। एतदपि कुरुक्षेत्र... पेक्षया व्यवस्थितं। तमनः षष्टिर्योजनन्तरोपल
स्य कर्मेयतावद्देश स्याद्दशाहेनोल्लसर्जितः। गुरुके जंतुमशक्यत्वात्। ज्ञातव्य। गिर्यादिसमुदायव्यवधानाभावेपि शास्त्रीय

x शान्ति ।

सचसप्रथमोमासः ६ ६ततजननंसप्तमेमासीत्युपनिषद्दर्शनात् चूडाप्रदेशचूडाकालोलक्ष्यते ६

॥ श्रु० ॥ षष्टियोजनानंतरेप्रयाणमनस्यतीरमुक्तिदेशस्थितप्रतिदेशान्तरमतत्वव्यवहारः प्रमाणिकानां सत्यपि वत्रिंशद्योज
॥ १२ ॥ जनानंतरत्वो न निर्याततुद्दिव्यवधानाभावात् कांश्यपनदस्यतीरमुक्तिदेशस्थितंप्रतिदेशान्तरमतत्त्वव्यवहारः गिर्बेतिशब्दः
समुच्चये न तस्माज्जमर्थः । षष्टियोजनानंतरोदेशोदेशांतरे । षष्टियोजनानंतरेपियत्राभाषाभेदस्तत्रापि महानद्यव्यवधानेति
१८ भवंतितदपिदेशांतरं । तस्मिन्देशांतरेप्रतस्य सद्यश्शौचं । अन्यवालाद्यशौचं तत्रयात्रवत्सरः । आदंतजननात्सद्यः । आचू
डान्नैशिकीस्मृता । त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरं । नैशिकी अहस्सुविदिः अहोरात्रमशौचमितिपर्यः ॥ अत्रदंतजननश
ब्देनदंतजननकालोलक्ष्यते तेन सचतृतीयवर्षवर्तती येऽप्रतिहतचूडाभिधानात् यद्यपि सांवत्सरकस्यचूडाकरण
नै मितिप्रथमवर्षविधानमस्तितथापिविप्रेतृतीयेत्रिभिर्वर्षैरित्यादिवाक्ये न द्वितीयवर्षसमाप्तिं यावन्नैशिकीवि
धानात्रदेकवाक्यतयाऽवरवर्षद्यतो । चूडाकालेत्रत्संकल्पकः ततोपोदः प्रथमादेस्तु कुलधर्मा वशाद्यवादन्तः चू
डाकरणमितिहारलताधृतभृगुपनयनंतेनापिस्वकालउपलक्ष्यते । सषड्दूर्वानंतरकालः पर्यवसितः । नचूडालक्षणो ॥
द्विजन्मनामपिकालस्तापानांतुषडाद्विकः । इतिस्मृत्यन्तरेप्रथमपर्यायदर्शनाद् नैनसप्रथममासमवधात्यवाल
मरणेसद्यःशौचं सप्रथममासमारभ्यद्वितीयवर्षसमाप्तिपर्यन्तं देवलहोरात्रं । ततः षष्ठवर्षव्याप्यत्रिरात्रंतदनंतरंस्वस्व ॥ वि० ॥
जात्युक्तमाशौचादीनांत्रयाणां । सप्तादीनांविशेषोभविष्यति । नगोपनयेनेकालस्यव्यवस्थापनात् । बालस्यमुं ॥ १२ ॥

न

४६२

स्त्वविवक्षितं तेन केन्यापां मरणे नेदमशौचं तत्र विशेषो वक्ष्यते ॥ अंतःसूतके चेदोत्पत्त्यानादाशौचं तावन्मात्रो
दककर्म ॥ अस्यार्थः ॥ अंतःसूतके सूतकांतरे चेद्बालो विपद्यते तदा उत्पत्त्यानादशमादिन यावदशौचं भव
ति । इदं च आउत्पत्त्यानादित्यभिधानात् ज्ञातुरेव ॥ अन्येषां तु पूर्वोक्तमेव सद्यःशौचं ॥ अपत्यमात्रमरणं चेह विवक्षि
तं । विशेषानुपस्थानात् ॥ अंगिराः ॥ विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी ॥ द्यहेन क्षत्रियस्य शुद्धिस्त्रिभि
र्वैश्ये मृते सति ॥ निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते ॥ निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरेव च ॥ त्रिभिर्वर्षै
र्न्यूने इत्यत्र त्रिभिर्वर्षैर्न्यूनत्वात् न्यूने असंपूर्णद्विवर्ष इत्यर्थः ॥ निवृत्तचूडकरणं इति निर्दिष्टा विनिहिता चूडाय
स्येति निवृत्तचूडकः शेषं सुबोधं ॥ ब्रह्मपुराणे ॥ अनुपनीतो विप्रस्तु राजा चैव वाथ नु गाहाद्भ्यः ॥ अगृहीतव्रतो दस्तु वै
श्यः शूद्रस्त्ववस्त्रयुक् ॥ म्रियते यत्र तत्र स्याद्दशौचं त्र्यहमेव हि ॥ द्विजन्मनां मयः कालः ॥ त्रजाणां तु षडादिकः ॥
पंचादिकस्तु शूद्राणां स्वजात्युक्तमतः परं ॥ अत्र क्षत्रियवैश्ययोः षडाद त्र्यंतरे त्रिरात्राभिधानात् । वेदादिनिय
तोरेव ॥ अन्येषां षडहनवाहो पूर्वोक्तौ एवमेवहारन्तनाकारः ॥ शूद्रस्यापि पंचाद्यंतरे त्रिरात्राभिधानं स
पूद्रविषयं ॥ इत्यपमेवहारत्नताकरो ॥ स एव प्रास्तुविशेषाशौचे पूर्वं दर्शिताः ॥ यदपि अन्नूढा(?) यानां कन्या

॥प्रु०॥ यानांत पावेस्य द्वजन्म नाप्नोति स्यादुपत्रिरात्राभिधानं तदपि सपिण्डविषयमेव॥ सामान्यस्तु स्यादा
॥१३॥ पोगंडे शिरोवाक्ये नैव व्यवस्था तच्चाध्या स्यादेत्रिवर्षस्य नेतु मते शुद्धिस्तु पंचभिः॥ अंगतः स्यादूर्ध्वं मते स्यादृश
दशाहेद्विभु शुध्यति। षड्वर्षान्तमतीतस्तु स्यादुः समन्यते यदि मासकं तु भवेदशौचं मिन्यं शिरमाषितं। एत
13 त्षड्वर्षोपरि मासकाशौचविधानं। विवाहितास्य दविषये॥ अविवाहितास्य षोडशवर्षं यावत् द्वादशाह
स्तदनंतरं मासिकमेवाशौचं। तथा च संखः॥ प्रत्यूढभार्यास्य दस्तु षोडशात्संवत्सरात्परं। मृतस्तु सम
धिजद्धेत्वां संतस्यापि वांधवाः। शुद्धिं समधिगच्छेति नात्र कार्यविचारणा॥ तदेषा समस्ता षंडलोके
न व्यवस्था। आलपणानां सप्तममासात्प्राक् वालके मृते सद्यः शौचं। सप्तममासादारभ्याद्वितीय
वर्षसमाप्तिं यावदेकमहोरात्रमशौचं। त्रितीयवर्षादवस्थ्य षड्वर्षान्तं यावत्त्रिरात्रं तदुपरि दश
हमशौचं भवति। क्षत्रियाणां सप्तममासात्प्राक् सद्यः शौचं। ततो द्वितीयवर्षान्तं यावत्षडहं त्रितीय
वर्षादारभ्य षड्वर्षान्तं यावत्षडह तदुपरि द्वादशाहमशौचं भवति॥ वैश्यानां सप्तममासात्प्राक् श्वाघ ॥वि०॥
शौचं। तदिने द्वितीयवर्षान्तं यावत्त्र्यहं तदुपरि षड्वर्षान्तं यावन्नवाहं तदुपरि पंचदशाहमशौचं भवति॥ ॥१३॥

विवाहिताविवाहितसाधारणं प्रसूतिकानां तु सर्वासामेव दशाहाभ्यंतरे बालमरणे यावद्दशाहः पूर्य्यते तावद् ५

शूद्राणां सप्तममासादारभ्य प्राक् सद्यःशौचं। सप्तममासादारभ्य द्वितीयवर्षसमाप्तिं यावत् त्र्यहं तत्तृती-
यवर्षादारभ्य षोडशवर्षं यावदविवाहिते मृते द्वादशाह तदुपरि मासमशौचं भवति। विवाहिते षोड-
वर्षादुपरि मृते मासमशौचं भवति। येषां शूद्राणां द्विजोच्छिष्टभोजनं द्विजशुश्रूषा मासि मासि मु-
ण्डनं च ते सच्छूद्राः। तेषां सप्तममासादारभ्य पंचमवर्षं यावन्मृते जाते त्रिरात्रं। तदुपरि षोडशवर्षान्निया-
वदविवाहितामृते द्वादशाहं। तदुपरि पंचदशाहं शौचं भवति। अत्र सर्ववर्णानामसंस्कृतद्विवर्षा-
बालो मृतो भूमौ निखनीयः। अग्निदानं तस्य न कर्त्तव्यं॥ यदि तु प्रमादादिना तस्य दाहक्रियते तदा ब्रा-
ह्मणानां त्रिरात्रं क्षत्रियाणामेकादशाहं। वैश्यानां द्वादशाहं शूद्राणां विंशतिरात्रं भवति॥ तथा च
ब्रह्मपुराणे॥ अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते। अग्निमोतादिभूतेस्य देशस्य धर्मभृद्वात्॥
अशौचं ब्राह्मणानां तु त्रिरात्रं तत्र विद्यते। राज्ञामेकादशाहं तु वैश्यानां द्वादशाहकं। अपि विंशतिरा-
त्रं तु शूद्राणां भवति क्रमात्॥ इत्यस्याशौचं॥ ब्रह्मपुराणे॥ आजन्मनस्तु चूडान्तं यत्र कश्चिद्विपद्य-
ते। सद्यःशौचं भवेत्तत्र सर्ववर्णेषु नित्यशः॥ ततो वाग्दानपर्यंतं यावदेकाहमेव हि। ततः परं प्रवृद्धानां

तं

॥स्मृ०॥ त्रिरात्रमितिनिश्चयः॥ वाग्दाने कृते तत्र ज्ञेयं चोभयतः स्मृतम्॥ पितुर्वरस्य च ततो दत्तानां भर्तुरेव
॥१४॥ च॥ स्यात्तजातसूतकमशौचं स्यात्तु सूतके मृतके तथा॥ अतः परमकृतवाग्दानावस्थानतः परं प्रवक्ष्या
14 मः साप्ताबाधिकारस्तु पाणौ मित्यर्थः॥ अधिकरूपं व्यक्तीकरोति वाक्प्रदाने कृत इति। उभयत इति इति व्या
करोति पितुर्वरस्येति॥ वरस्य भर्तुरित्यर्थः॥ ततो दत्तानां विधिपूर्वकं दत्तानां भर्तुरेव स्यात्तजातसूतकमशौचं
भवतीत्यर्थः॥ एवमेव हारलतापत्रे तु वाग्दानं न भवति। तत्र चूडानन्तरं विवाहपर्यन्तमेकाहमेवाशौचम्।
यथाह याज्ञवल्क्यः॥ अहस्त्वदत्तकन्यासु बालेषु विशोधनम्॥ अस्यार्थः॥ अदत्तकन्यासु मृतासु बाले बु
च जातदन्ते बुमृते बु अहरेकमहोरात्रमशौचं भवति॥ अयमर्थः॥ अत्र समुदायार्थः॥ सर्ववर्णानां द्विती
यवर्षात्प्राग्वत्कन्यामरणे सद्यः शौचं तदनन्तरं विवाहपर्यन्तमेकाहमहोरात्रमशौचं॥ विवाहानन्तरं
त गृहे शौचं न भवति॥ स्यात्पितृकुले संपूर्णाशौचं भवति। यत्र तु मृतासु भ्रातृगोत्रादातव्येति वाग्दानं क्रियते॥ ॥वि०॥
तत्र चूडानन्तरमृतायां तस्याविवाहपर्यन्तं पितृपतिपक्षयोरुभयोरपि त्रिरात्रमिति शेषः॥ विवाहतासु वि ॥१८॥
शेषमाह॥ ब्रह्मपुराणे॥ दत्ता नारी पितुर्गेहे सूयते म्रियतेऽपि वा॥ स्वमशौचं चरेत्सम्यक् पृथक्स्थाने व्यवस्थिता॥

वर्ग

तद्ध्रुववर्जं स्वैकेन स्युर्द्योतजनकत्रिभिः ॥ अत्र जनकत्रिभिरिति जनकशब्देन जननकर्तृत्वोपलक्षणात् जनन्या
अपि त्रिरात्रे शमस्तु द्विः ॥ तथा ॥ सिद्धवत्तु पारिजातरत्नाकरयोः मातापित्रोस्त्रिरात्रमित्युक्तं ॥ हारलताकारेणापि तत्त्व
वहेतुपूर्वकमप्युक्तमेव ॥ ध्रुववर्ज इत्यत्रापि ध्रुवशब्देन रक्तरूपापन्नाएकाश्रमस्याभ्रातृत्वे मातृत्वे मातृत्वेऽपि पितृव्य
तत्पुत्रास्ते बान्धवाः ध्रुवत्वेन ॥ ते चामेकाहः ॥ अत एव सिद्धवत्तु पारिजातहारलतारत्नाकरेषु भ्रात्रादीनामेकाहः॥
मुक्तं ॥ पितुर्श्यह इति ॥ सनाभिभ्यहो पत्न्यासुणां निजगदे अत्र सपिंडमरणेऽपि तन्त्रान्तत्राशौचमावणादतापि भ्रात्रादि
गृहमरणमपि विवक्षितं मरणसाहचर्यादत्र जननमपि तादृग्लभ्यते ॥ एतत्तु पारिजातस्यानुमतमेवेत्याहितेन नि
जव्यावस्थाने विशेषमनभिधाय पितृत्र्यहस्य विवक्षितत्वात् ॥ भ्रात्रादि गदे निजसंस्थाः प्रसवे मरणेऽपि सातिग्रशौ
चं न भवतीति प्रकाशकार इत्युक्तमतः प्रकाशकारस्यमतमेतत् ममत तु पितृशब्दस्याविवक्षितत्वं ॥ कृत्वशौच भार्जन्य
हं विवक्षितमित्येतस्यार्थोऽवगम्यते विशेषाविधानात् ॥ रत्नाकरस्वरसोप्येवमेव लक्ष्यते इति ॥ तद्विषये मन्त्रव्यवस्था विवाह
तास्त्री यदि पितृकुले प्रसूयते म्रियते वा तदा मातापित्रोस्त्रिरात्रमशौचं ॥ एकाश्रमवासिनो भ्रातृत्वे मात्रेऽपि पितृव्य

॥मु०॥ पुत्राणां तत्पुत्राणां पितृव्यस्य चैकरात्रं। पितुरभिन्नकामवासिनां मात्रादीनामशौचं न भवति॥ तथा॥ पित्राद
॥१५॥ त्तानुयाकंन्या स्वातंत्र्यादन्यमाश्रिता॥ येये सवर्ती प्रजसस्याशौचं त्र्यहं त्र्यहं॥ मृतायां वा प्रसूतायां नान्ये बान्ध
15 ति निश्चयः॥ कामादक्षतयोनिर्यदन्यं गत्वा व्यवस्थिता॥ तस्यान्यस्य सजोत्रास्तां पत्वा क्षितवती स्वयं॥ अस्यार्थः।
विवाहतास्त्री पाणिग्राहकादन्यं यं यं पुरुषमाश्रयति॥ तस्यैव पुरुषस्य तस्यां मृतायां प्रसूतायां वा त्रिरात्रमशौ
चं भवति॥ स्वयंग्राहककुलानामशौचं तरां न भवति॥ यदि च पाणिग्राहकेण तस्याः संगमः कृतस्तदा तस्य पाणि
ग्राहकगोत्रमेवावतिष्ठ स्वयंग्राहकं गोत्रं न भवति॥ यदि तस्याः सङ्गमो नवृत्तस्तदा यमेवाश्रिता भवति। तस्यैवान्य
स्य अन्यजो त्रस्य सजोत्रासा भवति॥ अशौचं तत्रापि त्र्यहमेव तथा। यदे तु स पुनरेव त्रवनात्काचित्स्वतां भवेत्ता
स्यामि गोत्रं भवेत् तस्या तद्भूयो विशिष्यते॥ येतत्कं त्वप्रसूतायां ततः पौर्द्धिकमर्तकं॥ अस्यार्थः। पाणिग्रहेवतो अ
समाप्त सप्तपदी समारोहणे यावता परेण हृता अन्यमाश्रिता भवति। तस्याः स्वभिगोत्रं पाणिग्राहकगोत्रमे
व भवति॥ अत्रापि विशेषमाह तद्भूयो विशिष्यते इति। भूयः पुनस्तज्जो त्रं विशिष्यते विभज्यत इत्यर्थः। विभाजमाह॥
यैतकं त्व प्रसूतायामित्यादि तस्या बलात्कारहृतायां यावत्प्रसवो न भवति तावत्पितृगोत्रमेव वर्तति एते प्रसवा ॥वि०॥
॥१५॥

नेत्रारंपर्यो वृद्धिकस्य भर्तुः । पाणिग्राहकस्यैव गोत्रे एव तिष्ठते । वत्सान्यकारभर्तुर्गोत्रे कदाचिदपि न स्यान्नभव
तीते ॥ प्रशौचं प्रसवमरणयोस्त्रिरात्रमेव हि भर्तुरिति ॥ चित्तवेश्मनि या नारी रजसा च परिप्लुता । प्रसवे मरणे
न शुद्ध भशौचं नोपशाम्यति पितुरिति शेषः ॥ इति कश्यपशौचं ॥ अथ गर्भस्रावाशौचं ॥ ब्रह्मपुराणे । पण्मासाभ्यंतरे
यावद्गर्भस्रावो भवेद्यदि । तदा मससमैस्तासां दिवसैः शुद्धिरिष्यते ॥ अत ऊर्द्ध्वं स्वजात्युक्तमशौचं तासु विद्यते
सद्यःशौचं सपिंडानां गर्भस्य पतने सति ॥ जन्मदिवसैरिति वहुत्वश्रवणान्मासानां वहुत्वं । यतः प्रभृति संभवति
तत्रैव व्यवस्थाते न त्रितीयमासोपरि पंचमासपर्यंतं यावन्तो मासास्तावन्ति दिनानि तासां ब्राह्मणादीनां
मशौचं भवति ॥ सपिंडानां स्वामिपुत्रादीनां सद्यःशौचं भवति । मासत्रयाभ्यंतरे विशेषमाह मरीचिः ॥ गर्भ
स्रुत्यां यथामासमचिरे तूत्तमे त्र्यहं । राजन्ये च चतुरात्रं वैश्ये पंचाहमेव च ॥ अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकी
र्त्तिता ॥ यथामासमिति ॥ यावन्तो मासास्तावन्ति दिनानि व्याप्याशौचं । एतच्च मासचतुष्टयादूर्द्ध्वं पण्मासं या
वत् । मासत्रयाभ्यंतरे त्वाह । अचिरे तूत्तमे त्र्यहमिति । अचिरे मासत्रयाभ्यंतरे गर्भस्रावे सति उत्तमे उत्तमजाती
ये ब्राह्मणादित्रियाणां च चतूरात्रं वैश्यपाञ्चाहं शूद्राणां पञ्चाहमशौचं भवतीत्यर्थः ॥ तथा कूर्मपुराणे ॥१॥

।।शु०।। गर्भच्युतावहोरात्रं सपिंडेत्यत्र [illegible] निर्गुणे। यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निबंधः।। अत्यंतनिर्गु
।।२८।। णा इति।। वेदैकदेशाध्ये(?)क्रियास्वल्पमेकाहः। यथेष्टाचरणे सर्वाश्रित्य सर्वविहीनत्वादिमति। त्रिरात्रं।।
16 एवमेव हारलतायदपि त्रिरात्रमशौचं हारीतेनोक्तं जातमृते मृतजाते च।। कुलस्येति तदपि यथेष्टाचर
णे ज्ञातिविषयमेव एवमेव रत्नाकरः जातमृत इति तन्मात नत्वर प्रव्यवहितकालमृत इत्यर्थः। तद्बहिर्जात
मरणे सर्वेषामेव शौचं पिंडानां सद्यःशौचं भवति। एवं च गर्भस्रावे सपिंडानां गुणवतां सद्यःशौचं तदेव सम्
दयार्थः गर्भस्रावे मासत्रयाभ्यंतरे ब्राह्मणस्य त्रिरात्रं।। मासत्रयोपरि षण्मासपर्यंतं यावन्तो मासेषु व्य
तीतेषु गर्भस्रावो भवति।। तावत्येव दिनान्यशौचं षण्मासोपरि दशरात्रमशौचं भवति। स्वपातेतु त्रिपिंडानां स
सद्यःशौचं भवति।। हारीत पापास्तु मासत्रयाभ्यंतरे दिनचतुष्टयं वैश्यपातः पंचाहं तदुपरि षण्मासं यावद्दु
र्भपोर्ध्वगतीतमाससमसंख्यानि दिनानि तदुपरि मासमशौचं भवति।। अत्र सर्वत्र निर्गुणसपिंडानामेका ।।वि०।।
हः।। यथेष्टाचरणानां सपिंडानां त्र्यहमशौचं [illegible]।। अथ प्रसूतिविशेषाशौचं।। वृद्धजाड्यः।। वृद्धः शौ ।।२८।।
चस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः। तस्य त्रिरात्रमाशौचं

नदुपरिस्वजातदंतमशौचं भवति भृगयामासत्रयं जावदष्टाहं ततः परं मासं यावदतीतमाससमसंख्यानि दिनानि ३

द्वितीयेत्त्वस्थिसंचयः॥ त्रितीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत्। शैवस्मृते लघु सूः इति यो वृद्धो मन्त्रो व्याधा
दिशौचं कर्तुं न शक्नोति अनुतप्तार्थस्य चिरेण वस्मृति स्तून्यः एवं विधो भृगुपर्वतादिभिरात्मानं घातयेत्। मिवज्जा
ने येन प्रतिक्रिय स्य गुरुवः आत्मानं घातयेत्। तत्र आत्मघाते दोषाभावः त्रिरात्राशौचादि। तयोः कर्मकर्तव्य
मित्यर्थः॥ ब्रह्मपुराणे॥ दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमान्यदि। प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा॥ अगाधतो
यराशौ च भृगोः पतनमेव च॥ भृगोः पर्वततटादित्यर्थः। जगन्महापथे वापि तुषारगिरिमादरात्। प्रयाग वटशाखा वा गा
देहत्यागं करोति यः॥ स्वयं देहविनाशे तु प्राप्ते काले महामतिः॥ उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित्। महा
पापक्षयः स्वर्गे दिव्यान्भोगान्समश्नुते। एतेष्वधिकारस्तु तपसां सर्वजन्तुषु। नराणां मथ नारीणां सर्ववर्णेषु सर्व
दा॥ ईदृसं स्मृतकं ये वा जीवन्तो कुत्रचिद्भवेत्॥ अशौचं न्यास्यात तस्य हेतवं वा वज्ञानं लभते न तथा॥ महामतिरिति स्वयं दे
हविनाश उपस्थिते अन्यथा। पिरोगेण संप्रत्ये वपर्दष्य मतः सात्विकतया स्वयमेवैतेषु स्थानेषु स्वदिदेहत्यागमी
ति हृतबुद्धिः महापापक्षय इति महापापक्षयोपलक्ष्यर्थः। तेन महापापक्षयो प्येवं कृतमरणादिव्यान्भोगान्स
मश्नुते। किमुत धार्मिक इत्यातिशयप्रदर्शनं एतेषां मरणरूपानां तपसां सर्ववर्णव्यक्तिसाधारणोधिकारः॥१॥

॥मु०॥ ईदृशमित्यादेरयमर्थः ॥ एवंविधमरणे प्रवृत्तानां दैववशात्तत्काले जीवतां कालांतरे मृतानां त्रिरात्रमेवाशौचं
॥१९॥ तत्कालमरणे त्रिरात्रमित्यविवाद एव । वज्रानलहतेतथेति ॥ एतदप्येवंविधेषु प्रजस्थितेषु वज्रानलहतेषु
त्रिरात्रमितिदर्शयति । ज्ञयाज्ञस्थितइति तु कश्यपवाक्यैकवाक्यतयालभ्यते ॥ अंगिराः ॥ व्यापादयेद्यथात्मा
17 नं स्वयंयोऽन्युदकादिना । विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया यस्करोत्यादिर्नहेतुनाऽत्रगन्यादिभिरात्म
नं घातयति तस्याशौचाग्निदानादिक्रिया न कर्तव्या ॥ अथ कश्चित्प्रमादेन म्रियेतान्युदकादिना । तस्याशौचं
विधातव्यं कार्या चास्योदकक्रिया ॥ प्रमादेनानवधानेन न योऽस्तु दुकाद्यमृत्युहेतुभिर्म्रियते तस्य संपूर्णम
शौचं कर्तव्यं ॥ संकोचे प्रमाणमावाद्वा ॥ उदकक्रिया कर्तव्या ॥ अग्निसंस्कारोदकदानादिकाः क्रियाः कर्तव्या इत्यर्थः ॥
तदुदकक्रियेत्यस्योपलक्षणत्वात् ॥ तदेवमत्र समुदायार्थः । शौचाचमनाद्यसमर्थस्य वृद्धस्यासाध्यव्याधिग्र
घ हीनस्य वबुद्धस्यमरणेच्छयाऽग्निजलादिप्रवेशेन घातयति ॥ तेषामग्निदाहादिकं न कर्तव्यं । तन्मरणानि
मपितर त्रिरात्रमशौचं कर्तव्यं ॥ प्रमादेनाऽम्बुदकवज्रादिना मरणे संपूर्णमशौचं । अग्निसंस्कारादिकाः क्रियाः क ॥वि:॥
र्तव्याः ॥ सपिंडाः शौचं नु वत्सौ यमः ॥ किंचाहवहतानां च विद्युतापि पार्थिवेन च । गोब्राह्मणस्य चैवार्थे यस्य ॥१९॥
मरणेसपिंडानां त्रिरात्रमशौचं तत्काले त्वग्न्यादिप्रवेशेन म्... जलादिघातमानं ३

वेष्टति पार्थिवः ॥ डिम्बः शस्त्रैर्विना कलहः । संमर्द्दो वा ॥ आहवः संग्रामः विकृतावज्ञानतो नदंदं च वज्ञा
नत्वेन मरणे सद्यः शौचाभिधानं मरणात्रिक प्राप्यभिवृत्ते प्रवर्त्तनस्य मरणे द्वेपं ॥ पार्थिवो राजसत्वेन प्रसिद्धः न
क्षत्रियएवेति रत्नाकरः ॥ गोब्राह्मणस्यैवार्थे युद्धादन्यत्रापि जनलयं कोद्वारा होसनतां सद्यः शौचं य
स्य वेष्टति पार्थिव इति यस्य कार्यतया कादाचित्कः पवापीपति सद्यः शौचमिच्छति ॥ आवह इति यदुक्तं
तत्राविशेषमाह ॥ उद्यतैराहवे शस्त्रैः क्षत्रधर्म्महतस्य च सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्मृतं ॥
सद्यः शौचमिति योजना । क्षत्रधर्म्मोऽकातरत्वादि शस्त्रैर्विषपङ्क्तिपिण्डदानादिरूपः । संतिष्ठते समाप्ति
मिति सद्यश्चेत्यर्थः ॥ पाराशरः ॥ आत्मनो यद्यपि विपन्नानां दंडिनां गोग्रहेषु च । आहवेषु विपन्नानामेकरा
त्रमशौचमिति स्मृतिः ॥ अत्र दंडिनां मितिर्विपिसंवध्यते । ततश्चायमर्थः गोब्राह्मणार्थे गोग्रहेषु द्वेत्रम
शौचं ॥ एवमेव हारलता ॥ अत्र दंडिनामित्यत्र वंदनामिति रत्नाकरे पाठः । वंदिनां चौरादिगृहीतानां
तद्दशायामेव मरणे एकरात्रमशौचमिति व्याख्यातं । बृहस्पतिः ॥ डिम्बाहवे विद्युता वा राज्ञो गोविप्र
पालने ॥ सद्यः शौचं हतानां स्यादृते हं चान्ये महर्षयः ॥ अत्र शस्त्रैरभिमुखहतस्य सद्यः शौचं ॥ १

भेदसस्य
स्य

रहिते

दंडेनम्रता
नामेकरा

यमः

यमः०।। लगुडादिना पराङ्मुखहतस्य त्रिरात्रमिति व्यवस्थितविकल्पार्थश्चकारः। डिम्बाहवनिहतानां नावत [illegible] वैव प्रा
।।१८।। णिनां त्रिरात्रं। नदीश्वापददंष्ट्रिभ्यः सद्यःशौचं विधीयते॥ प्राणसंत्रिणमिति परार्थे मिति परार्थं प्राणत्यागि
नामित्यर्थः। नदीति जलाशयोपलक्षणं। श्वापदं नखायुधाः सिंहव्याघ्रादयः। दंष्ट्रिणो दशनायुधाः सर्वे वा
18 राहादयः॥ एतच्च नृपादिमरणे सद्यःशौचं। मरणान्तिके प्रायश्चित्ते काम्ये चाग्निवेणीसंगमादौ मरणे स
द्यःशौचं नृत्वगौ। संखलिखितौ॥ ०प्र यशस्तानशनाग्निरज्जुमृत्युजलाग्निप्रपातेष्वेवमेवं। अनशन
मयोऽनपेतदपि सद्यःशौचं॥ काम्ये प्रयागादौ शस्त्रादिना मरणे प्रायश्चित्ते च मरणान्तिके क्षेपे। तदपि
सद्यःशौचादि [illegible] मस्ताखंडलार्थः। संमर्द्दहतानां शस्त्रसमूहन्यकुलहतानां राज्ञा हतानां गोब्राह्म
णार्थे जलपंकादिमग्नानां संग्रामे शस्त्रेण संमुखहतानां मरणान्तिके काम्ये कर्मणि प्रयागादौ प्रायश्चित्ते
च शस्त्रजलाग्निश्वापदादिमृतानां सद्यःशौचं। ब्राह्मणार्थे गवार्थे दण्डेन विपन्नानां वंदीकृतानां मृता
नामहोरात्रमशौचं लगुडादिना संग्रामे पराङ्मुखे हतस्य त्रिरात्रं॥ पाराशरः॥ उपसर्गः मृते चैव सद्यःशौ ।।वि०।।
चं विधीयते। एतच्च प्रचुरोपसर्गोपद्रवानिपाताविषयमिति प्रतिभाति। उपसर्गमृते संस्पर्णाशौचस्य ।।१८।।

प्रमाणिकव्यवहारविषयत्वात्॥ तथा च ॥ आपद्यपि च कष्टायामपि सत्रसद्यःशौचं ॥ अत्यंतदुर्भिक्षे उपस
र्गे कात्यंतमरणादिपीडायां च नाशौचमिति हारलताकारः ॥ आह ॥ तथा च दक्षः ॥ स्वस्थकाले त्विदं सर्वं
सूतकं परिकीर्तितं ॥ आपद्गतस्य सर्वस्य सूतकेपि न सूतकं ॥ यत्तु उपसर्गपदं तद् इति उपसर्ग इति ॥ आवि र्भा
तोपसर्गे मरणे सद्यःशौचं ब्राह्मणपाकपरं परपाकमरणे सद्यःशौचमिति व्याख्यातं केश्चित्तत्रते ॥ आविर्भा
वे उपसर्गस्य ज्ञानात् प्रादुर्भावे ब्राह्मणपाकपूर्वीनस्य याममरणे नप्यव सामान्य एव स्यात्तद्विभावपं ॥ असपिण्ड
घशौचं ॥ तत्र बृहस्पतिः ॥ दशाहेन सपिंडस्तु शुध्यंति प्रेतसूतके ॥ त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यंति गोत्र
जाः ॥ सपिण्डास प्तमपुरुषावधयः स्वदेशे ॥ सकुल्या दशमपुरुषावधयः ॥ तदूर्ध्वं गोत्रजाः ॥ प्रेतसूतके चेत्यर्थः ॥
मनुः ॥ गुरोः प्रेतस्याशिष्यस्तु पितृमेधं समाचरेत् ॥ प्रेतहारैः समं तत्र दशरात्रेण शुध्यति ॥ अस्यार्थः ॥ यः शिष्यो
वेदाध्ययनेन गुरुकुले तिष्ठन्तु गुरोः संस्कारं करोति दशरात्रेण शुध्यति ॥ गुरुलक्षणमाह ॥ अल्पं वा बहु वा यस्य
वेदविषयकस्य
श्रुतस्योपकरोति यः ॥ तमपीह गुरुं विद्यात् श्रुतस्योपक्रियात या ॥ इति श्रुतस्याध्यापनस्योपकरोतीत्यर्थः ॥
त्र्यहमित्यनु ॥ बतौ जो नमः ॥ आचार्यतत्पुत्रस्त्रीयाज्यशिष्ये चैव मनुः ॥ आचार्यं उपनयनपूर्वकं सांगवेदाध्यापकं त

॥ मु० ॥
॥११९॥

19

स्मिन्नन्तःपुत्रे च मृते नन्त्यन्त्यां च मृतायां शिष्यस्य त्रिरात्रमशौचं। ऽप्योतिष्टोत्यादियागं कुर्वतो यस्य सर्वद
त्विंऽयं त्रिः प्रसजात्यः॥ तस्मिन्नन्तःकृत्विजे त्रिरात्रमशौचं॥ शिष्योत्रोपनीयसांगवेदाध्यापितः तस्य गु
रुकुलस्थितस्यैव मरणे आचार्यस्य त्रिरात्रमशौचं॥ मनुः॥ त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः॥ दिवारात्रमहोरात्रमित्यर्थः॥ एतच्चाहोरात्राशौचं शिष्यस्यानिव
सोध्ययनस्य आचार्यपत्नीपुत्रमरणे ज्ञेयं। अधीयानस्य तु तयोरपि मरणे त्रिरात्रं गौतमोक्तं॥ बृहस्पतिः॥
त्र्यहमातामहाचार्यश्रो। त्रिदिनेनैव शुचिर्नरः॥ मातुले पक्षिणीरात्रिं शिष्यर्त्विग्बांधवेषु च॥ आश्रोत्रियेत्वहःश्र
स्ततमनूचानेन यथा गुरौ॥ स्त्रैराज्ञि तिसऽप्योति र्दस्य स्पाद्विषये स्थितः॥ श्रोत्रिय एकशाखाध्येता। एकां शा
खामधीत्य श्रोत्रिय इति बौधायनवचनात्॥ तस्मिन्नस्वगृहमृते गृहपते त्रिरात्रमशौचं। तथांगिर॥
गृहे यस्य मृतः कश्चिदसपिंडः कथंचन॥ तस्याप्यशौचं विज्ञेयं त्रिरात्रमिति निश्चयः॥ असपिंडः सोत्रिय॥
अश्रोत्रियेत्वसपिंडे स्ववेश्मनि मृते एकाहोरात्रं। तथा चैकरात्रामनुवत्। विष्णुः॥ असपिंडे च स्ववेश्मनि इति ॥ वि० ॥
अत्रासपिंडे श्रोत्रियः। मातुलपक्षिणीति। मातुले मातृसहोदरः भ्रातरि शिष्ये पितृकुलानि वताध्य ॥११९॥

यजने मृते सति पक्षिणी। उपनीयवेदैकदेशमध्यापिते ऽनुपनीय सम्पूर्णवेदमध्यापिते स्वगृहमृते
शिष्ये ऽप्याचार्यस्य पक्षिणी। ऋत्विजि मृते यजमानस्य पक्षिणी।। यो च वेमान्त शूले यदि रञ्जो वस्पतेत मरणे पि
पक्षिणी।। पक्षिणी तु पूर्वापरदिनसहिता रात्रिः।। पूर्वापररात्रिसहितदिनं वा। अश्रोत्रिय इत्यादि अश्रोत्रिये तु स्वगृहे
मृते ऽहः। एकत्र ब्रह्म होरात्रव्याप्यः। अनूचानः साङ्गवेदाध्येता तस्मिन्नेकग्रामे मृते गुरावन्याध्यापके मृते एकमहोरा
त्रमेवमेव हारत्नता।। मृते राजनि स्वतन्त्रे तद्देशाधिपे सज्योतिः। दिवा मरणे दिनमात्रं रात्रौ मरणे रात्रिमात्रं श्रोत्रियं प्रज्ञाना पि
योनि त्यर्थः।। ज्योतिषः।। पक्षिणी असपिण्डे सबन्धे सहाध्यायिनि च। असपिण्डे समानोदके। दशकुरुबाहूकैं ज्ञापमानज
न्मनामके मृते पक्षिणी। सहाध्यायिनि च। एकस्मात् गुरोः सह वेदमधीतवान् तस्मिन् वलिन वे पक्षिणी। अन्यत्रैकाहः।।
योनिसम्बन्धे मृते पक्षिणी। योनिसम्बन्धाश्च मातृष्वसृपितृष्वसृमातुलमातुलानीमातुलपुत्रमातुलदुहित्रो ज्ञाः।।
दौहित्रं भागिनी भागिनेयाः स्वस्रस्वशुरौ च। तथा च यम इत्यनुवर्तमाने मितातरा कारः। स्वशुरयोः स्वभागिनेयो मातु
लान्यां च मातुले पित्रोः स्वसरि तद्दृष्ट्वा पक्षिणीं सर्वान्ति शंस्। तथा। मातुले स्वशुरे मित्रे गुरौ गुर्वङ्गनासु च। अशौ
चं पक्षिणीं रात्रिं मृता मातामही यदि। तथा संस्थिते पक्षिणी रात्रिं दौहित्रे भगिनीसुते। अत्र स्वस्रस्वशुरमरणे पक्षिणी प
शौचं निर्गुणत्वापातर विषयं। मित्रे स्वगृहे मृते पक्षिणी। गुरुरत्र उपनीय किंचिद्वेदाध्यापक अनुपनीय कस्याख्या

त्र्युपं श्रोत्रिये पि गुरुकुलमृते त्रिरात्रं ९

॥भु०॥ ध्यापकस्य तादृशो गुरोः पत्नी गुर्वङ्गना। न को ऽर्हत पोर्दान्नि मोः ऽसावालिः॥ समानोदकानां त्र्यहं गोत्रजानामहः स्मृतं

॥२०॥ मातृबन्धो गुरौ मित्रे मण्डलाधिपतौ तथा॥ गुरुरत्र वेदाङ्गाध्यापकः। मातृबान्धवाः परिभाषिताः॥ मातुः पितृष्व-

२० सृपुत्राः। मातुर्मातृष्वसुः सुताः। मातुः मातुलपुत्राश्च विज्ञेया मातृबान्धवाः। तेषु। स्विन्नते ऽह्नैकाहं मण्डलाधि-

पते राजनि मृते एकाहः। श्रोत्रियाध्यापनः। त्रिरात्रमहोरात्रमेकरात्रमिति कुर्वीत। तथाचार्याध्यापकः तत्पुत्रेषु त्रिर-

त्रमृत्विजां च। शिष्यसतीर्थ्यसब्रह्मचारिणेषु त्रिरात्रमहोरात्रमेकाहमिति कुर्वीत। यथासंख्यमन्वयः। उपाध्याये

त्र यत्किंचिद्वेदाध्यापकः॥ ऋत्विजो वेति सपृष्ठ्यर्थे भवी। ऋत्विक्षु मृते षिष्ठत्यर्थः। एतच्च यजमानस्य ऽहमृते षु त्रिरात्रं यजमा-

न स्पर्शे [illegible] सतीर्थ्यः समानगुरुः सब्रह्मचारी समानाचार्यः॥ एकाहपदमुभयत्र ज-

दिनमात्रं रात्रिमात्रं वा लक्षयति॥ ऋत्विग्दिन्पनुवक्तौ विग्रहः॥ आचार्यमाता मृते नीते त्रिरात्रेण। आनौरसे पुत्राते पुत्रे षु

च मृते पुत्र च॥ परपूर्वासु भार्यासु प्रसूतासु मृतासु च। आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्यसह-

ध्यायिशिष्येषु चैकरात्रेण स्वदेशराजनि च। अनौरसेषु पुत्रे औरसं वर्जयित्वा एकादशस्वेव पुत्रेषु अन्तेषु मृतेषु ॥वि०॥

च त्रिरात्रं॥ परपूर्वासु पूर्वपरपरिग्रहीतासु भार्यासु त्रिरात्रं। अत्र यद्यपि इदं त्रिरात्राभिधानं त्रैवर्णिकविषयमिति॥ ॥२०॥

रत्नाकरशुद्धिविषयेव्याख्यातं तथा विशेषानभिधानात् सर्ववर्णविषयता सर्वप्रमाणिकानुमतत्वाच्च चातुर्वर्ण्य
साधारणमेवविज्ञेयमिति। हारलतादिष्वपि विशेषेनोक्तः॥ आचार्यशब्दः पत्नीपुत्रयोः विशेषणं उपाध्यायो
यात्विक् चिदध्यापकः॥ मातुलादयः प्रसिद्धाः सहाध्यायी वेदैकदेशे सहाध्येता संपूर्णवेदसहाध्यायी निव
त्ताध्ययनः स्वशिष्यः॥ अनूचानो नीतो वेदः साङ्गमध्यापितः॥ स्वदेशराजा स्वधर्मस्थः एतेषु मृतेषु एकरात्रमा
तुलो त्र मात्र वैमात्रेयः मातृसहोदरेतु पक्षिणी मातुलादिषु स्वगृहे मृतेषु त्रिरात्रम्॥ तथा च प्रचेताः॥ मातृष्व
स मातुलयोः श्वश्रूश्वशुरयोः॥ गुरौ ऋत्विजि चोपरते त्रिरात्रम्॥ याज्ञवल्क्यः॥ अनौरसेषु पुत्रेषु भार्या
स्वन्यगतासु च॥ निवासराजनि प्रेते तदहः शुद्धिकारणं॥ अत्रानौरसाः पुत्राः असवर्णासु भार्यासु जाताः॥ असव
र्णाः॥ असवर्णापुत्रेषु सवर्णा भार्यासु च त्रिरात्रं॥ तथा च संवर्त्तः॥ अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। परपूर्वा
सु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते॥ अत्र भार्यास्वन्यगतासु त्रिरात्रे सजातीयोत्कृष्टजातीयपुरुषान्तरगतासु मृता
सु प्रसूतासु च द्रष्टव्यं॥ अपकृष्टजातीयगमने महापातकित्वादशौचाभावादिति हारलता॥ एवमेव विप्रे दत्तादरापि
तथा च संवर्त्तलिखितौ॥ अन्यपूर्वासु भार्यासु कृतकेषु सुतेषु च॥ नान्याध्यायिनो नोदकक्रिया॥ अत्र भार्यासु

॥प्रु०॥
॥२९॥

न्यपूर्वासती पुनरप्यप्रजातीप्रजा। कृतकः पुत्रो ऽशौचाद्यपि कल्पितः॥ न जो ऽर्भतजो नाशौचं नोदकक्रियेति रत्ना-
करः॥ ब्रह्मपुराणे॥ यदा चान्यस्य दत्तायां कुत्रचित्पुत्रयोद्भवो। पितुर्यत्र त्रिरात्रं स्यादेकं तत्र सपिंडतो। एकमाता
द्वयोर्यत्र पितरौ द्वौ च कुत्रचित्॥ तज्जो ऽन्यस्य सूतकादैकं मृतकाद्यपरस्परं। अयमर्थः॥ आदौ प्रथमपत्न्येनविवाहि-
तानैनैव जनिता पुत्रा सपुत्रा यदान्यस्मात्क्रीता। तेनापि जनितपुत्राय वतितदा द्वयोरपि पुत्रयोर्मरणे प्रसवे चापि
तीयपितुस्त्रिरात्रं। एवंविधे च विषये तत्सपिंडानां एकरात्रं। एकमातोत्पादि। एकमातृजो भिन्नपितृकत्जो ऽर्भ-
ध्ये एकस्य प्रसवे मरणे चेतरस्य मातृजानां तु न शौचं। परपूर्वास्वन्यगतासु च भार्यासु च। अनौरसेषु पुत्रेषु पा-
न्यपतियोगकं भार्याद्यपत्यप्रतियोगिकं च पुत्रत्वं तत्रैव। अपहाशौचं भार्यापुत्रशब्दो ससंबन्धे शब्दत्वात्सपिं-
डानां शौचाभावः॥ अत एव मिताक्षराकारा प्रजापतिः॥ अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धि
स्युस्त्रिरात्रेण तत्पिता॥ न दत्तस्य प्रकरणार्थः॥ सपिंडमरणे दशरात्रं। अत्र दशपुरुषा। दारभ्य दशमपुरुषं यावत्
सकुल्यमरणे त्रिरात्रं। न हृद्धि ज्ञापयमानं नाम तत्परंपरा कज्ञाति मरणे पक्षिणी। अज्ञापयमानं नाम तत्परंपराके
अस्मज्जो ऽत्र जरत्येव माकारस्मात्रज्ञानगोचरे मृते स्नानमात्रं॥ आवार्यमरणे संस्कारैः कर्तुः। शिष्यस्य दशरात्रं। ॥वि०॥ ॥
॥२९॥ ॥

श्री

व

स्वैर

यदि संस्कारं न करोति तदा शिष्यस्य त्रिरात्रं ॥ आचार्यपत्नीमरणे आचार्यपुत्रमरणे च गुरुकुलस्थितस्य
शिष्यस्य त्रिरात्रं ॥ स्वगृहस्थितस्य शिष्यस्य तत्पौरमरणे एकरात्रं ॥ उपनीय किंचिदध्यापके उप्राध्युपजेतस्ने संकष्टं
ऽपि मृता अध्यापके च गुरौ मृते च पक्षिणी ॥ तथा ॥ विद्यागुरुपत्न्यां मृतायां पक्षिणी ॥ यत्किंचिदध्यापके उपाध्याये मृते
एकरात्रं ॥ उपाध्यायपत्न्यां मृतायां मेकरात्रं ॥ उपाध्यायपुत्रे च मृते एकदिनमात्रं रात्रिमात्रं वा ॥ आचार्यगृहस्थितस्य
शिष्यमरणे आचार्यस्य त्रिरात्रं ॥ उपनीय वेदैकदेशमध्यापितस्य ॥ अनुपनीयसंस्कृत्य शास्त्रमध्यापितस्य च शिष्यस्य
मरणे गुरोः पक्षिणी ॥ यत्किंचिदध्यापितस्य शिष्यस्य मरणे उपाध्यायस्य एकाहोरात्रं वेदसहाध्यायिनि मृते तु त
स्य पक्षिणी ॥ यत्किंचित्पाठसहाध्यायिनि मृते एकरात्रं ॥ समानब्रह्मचर्ये ॥ तेनानुरोधीमानेन मृते ॥ अपरस्य
एकदिनमात्रं रात्रमात्रं वा ॥ संघीनिवासिनि मित्रे स्वगृहे मृते गृहस्य त्रिरात्रं ॥ अन्यस्मिन्मित्रे स्वगृहे मृ
ते पक्षिणी ॥ अन्यत्र मृते मित्रे एकरात्रं ॥ श्रोत्रिये स्वगृहे मृते गृहस्य त्रिरात्रं ॥ अश्रोत्रिये स्वगृहे मृते एकरात्रं ॥ ए
कग्रामे श्रोत्रिये मृते ग्रामवासिनां मेकरात्रं ॥ यजमानस्य स्वगृहे मृते ऋत्विजां त्रिरात्रं ॥ अन्यत्र मृते एकरात्रं ॥ स्वद
याऽपेयजमाने मृते याजकस्य त्रिरात्रं ॥ मातामहे मृते दौहित्रस्य त्रिरात्रं ॥ मातामह्यां मृतायां पक्षिणी ॥ मातुले

॥ प्रु० ॥ मातृष्वस्रेये चैव पितृष्वस्रेये मातुलपुत्रे दौहित्रे भागिनेये मृते पक्षिणी ॥ भगिन्यां मातुलान्यां मातृष्वसरि
॥२२॥ पितृष्वसरि च तासां पक्षिणी रात्रिः । मातुर्वैमात्रेये मातुः पैतृष्वस्रेये मातुर्मातृष्वस्रेये मातुर्मातुलमातुलपुत्रे श्व
22 श्वशुरे श्वश्र्वां श्यालके मृते एकरात्रं । निर्गुणा ज्ञा मातुः श्वश्रूश्वशुरमरणे पक्षिणी । स्वगृहे मृते मातुले श्व
शुरे गुरौ स्वगृहे मृतानां मातृष्वसरि स्वस्रा च त्रिरात्रं ॥ स्वतन्त्रे राजनि स्वकर्मस्थे मृते एकाहोरात्रं प्रजानां ॥
अत्र स्वकर्मस्थराजनि मृते दिनमात्रं रात्रिमात्रं वा क्षेत्रजादिषु कादशासु पुत्रेषु जातेषु मृतेषु च माता
मातापित्रोस्त्रिरात्रं । क्षेत्रजादीनां मपि मातापितृमरणे त्रिरात्रं ॥ परपूर्वास्वन्यजातासु मृतासु प्रसूतासु च त्रि
रात्रं । एकमातृकयोर्भिन्नपितृकयोर्भ्रात्रोः परस्परं जननमरणयोः स्वमात्रजातापुत्रं संपूर्णाशौचं । तज्जोर्मि
रणे प्रसवे च पितुस्त्रिरात्रं । नत्सपिण्डजातजोर्मरणे एकरात्रमशौचं भवति । हीनवर्णगामिनीषु भार्यासु स्वाशौ
चाभावः ॥ इति सपिण्डाशौचं ॥ अथ निर्हरणाशौचं ॥ अंगिराः ॥ यः कश्चिन्निर्हरेत्प्रेतमसपिण्डं कथंचन । स्नात्वा
सचैलः स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि शुध्यति ॥ निर्हृत्य चेत्ववहितृत्वपि नराः इदं च धर्मनिश्चयात् । अनाथप्रेतवहने त्वशौचं ॥ वि० ॥
पाराशरः ॥ अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः । पदे पदे यज्ञमानुपूर्व्याप्नुवन्ति ते । न तेषां अशुभं किंचित्पापं ॥२२॥
पं
फल

वास्तु भकर्मणः ॥ जलावगाहनात्रैषां सद्यः शौचं विधीयते ॥ प्रेतसंसर्गे संस्कारैः आलम्भनेनैव दुष्यति । वोढो
चाप्यग्निदाता सद्यः स्नात्वा शुचिर्भवेत् ॥ संस्कारे च प्रेतप्रसाधनं प्रग्निदानस्पर्शनयुक्पादानात्पैठीनसिः ॥
अस्पृश्यं चेद्द्विजोन्यं वहित्वा दहित्वा सद्यः शौचं । स्पृश्यं चेत्त्रिरात्रं । इडागमोत्रद्वदेवः । सद्यः शौचं धर्मबुध्या दाहादौ
स्पृश्ये सति त्रिरात्रमिति ॥ मातुलमातृष्वसृपत्नीश्वसृपातिनां येषां मरणे शौचमुक्तं ते बांदाहादौ त्रिरात्रमशौ
चं भवति । ते च मातुलादयोऽस्य वस्यापि मालिरव्यते । मनुः ॥ अनुगम्येछया प्रेतं ज्ञातिमज्ञातिमेव वा । स्नात्वा सचेलः
स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥ ज्ञात्यनुगमने अग्निस्पर्शघृतप्राशनमात्रमधिकं विधीयते ॥ अशौचं यद्यो रमेव
कूर्मपुराणे ॥ असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ॥ असित्वा च सहोषित्वा दशरात्रेण शुध्यति ॥ यद्यन्नमत्ति ते
षां तु त्रिरात्रेण ततः शुचिः ॥ अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् । सोदकेष्वेव मेव स्यान्मातुराप्तेषु बन्धुषु ॥ निर्हृत्य बन्धुपतद्दे
ण ॥ बान्धवेतरे दाहनादावपि तुल्याशौचं विधानान्तरार्जित्वा साम्यावेतदन्नभोजने यथा त्रिरात्रं । नयनान्नभोजनाभावे तद्गृहवासेपि
त्रिरात्रं तुल्यन्यायात् । एतत्सर्वं निर्हरणशौचं आलम्भनं निर्हरणदाहादौ आलम्भने वा । अन्यत्र विशेषो वक्ष्यते । कूर्मपुराणे । पक्षेः सहसा संकुर्यात्
शयनादीनि चैव हि ॥ बान्धवो वा परो वापि स दशाहेन शुध्यति ॥ आदिपदमालिङ्गनावहसंवाहनादिपरं दशाहपरं तूपलक्षणं ॥

॥शु०॥ तदशौचापगमे न शुध्यतीत्यर्थः॥ तथा॥ यस्तेषां मन्नमश्नाति सकृदेवापि कामतः॥ तदशौचे निवृत्ते सो स्ना-
नं कृत्वा विशुध्यति। तेषां आलयादीनाम् अशौचं यः सकृदपि कामतो बुद्धिपूर्वकम् अश्नाति य ऽज्ञातिमाशौचा-
॥२३॥ न्नमुक्तेऽतऽज्ञानी तापगमे शुध्यति। शेषे चश्नानं। प्रमादतस्तु भोजने कृते न दोषः। दुर्भिक्षे बुद्धिपूर्व-
कभोजने न दोषमाह॥ यावद्दिनानि मश्नाति दुर्भिक्षोपहितो नरः॥ तावन्त्याहान्यशौचं स्यात् प्रायश्चित्तं
23 ततश्चरेत्। प्रायश्चित्तं चात्र त्रिरात्रं दुग्धमात्रपानरूपं। यथाचाङ्गिराः॥ न लद्वात्रिपविशंशुक्ता
न देषोऽस्यपडिनहोत्रिणां॥ सूतके शावमाशौचे ऽस्थिसंचयनात्परं॥ अनंशात्रप्रवक्तानां मामन्नम म
गर्हितं॥ शुक्रापद्याऽन्नमेतेषां त्रिरात्रं तु पयः पिबेत्॥ आललगादीनां त्रयाणां माडिनहोत्रिणां सूतके सि-
द्धान्नभोजने दोषाभावः॥ मरणाशौचे ऽस्थिसंचयनानन्तरं तत्सिद्धान्नभोजने दोषाभावः॥ अनज्ञने
नामन्नसत्रप्रवक्तानां नियमपूर्वकप्रात्यहिकान्नदायकानाम मन्ने न दोषाभावः॥ सिद्धान्नेऽपि शुक्ले दो-
ष एव॥ तत्र त्रिरात्रं दुग्धमात्रपानं प्रायश्चित्तं॥ पयःपदं दुग्धमात्रपरं मिति हारलता॥ अशौचेन्तु त-
त्र ज्ञानशुक्रमेवाशौचान्नभोजने॥ वाक्य; तत्रोक्तं॥ कूर्मपुराणे॥ दशाहेन शावस्पर्शी सपिण्डश्चैव शुध्यति॥ यदि ॥वि०॥
निर्दहति प्रेतं प्रलोभाक्रान्तमानसः॥ दशाहेन द्विजः [illegible] शुद्ध्येद् द्वादशाहेन भूमिपः॥ अर्द्धमासेन वैश्यस्तु ॥२३॥

स्पृष्टो मासेन शुद्ध्यति ॥ षड्रात्रेणाथवा सर्वे त्रिरात्रेणाथवा पुनः ॥ अत्र षड्रात्राशौचमापत्काले मूल्येन न-
दाहे कृते अस्पृश्यत्वं नापत्काले त्रिरात्रमिति विभागः ॥ मनुः ॥ अवरश्चेद्वर्णमवरं वावरो यदि ॥ अशौचे सं-
स्पृशेत्स्नेहात्तस्याशौचे न शुध्यति ॥ अवरो हीनजातिः ॥ वरश्चोत्कृष्टजातिः ॥ तथादिस्पृशेत् दहनवहना-
र्थं तस्य शवस्पर्शऽज्ञानीयः ॥ शवस्पर्शाऽज्ञात्पुत्रो नो शौचकालेन शुध्यतीत्यर्थः ॥ पाराशरः ॥ प्रेतीभूतं तु यः स्पृ-
ष्ट्वा ब्राह्मणं ज्ञानदुर्बलः ॥ अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥ याज्ञवल्क्यः ॥ ब्राह्मणेनानुगन्तव्यो
न तु शूद्रः कथंचन ॥ अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक्शुचिः ॥ इदं च सर्वं शूद्रानुगमनं
निषेधपरं ॥ यदि तु कार्यान्तरेणापि शवशूद्रानुगमनं भवति तदा स्नानादिना शुद्धिः ॥ अत्र मनुः ॥
योऽसवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः ॥ अशौचं तु भवेत्तस्य प्रेतजातिसमं तथा ॥ सर्वे वर्णाः सजातीयं दग्ध्वा-
प्यहमशौचिनो भवन्ति ॥ परजातीयं निदास्य परजातिवत् ॥ सर्वे वर्णा नो सजातीयदाहे यदि त्रिरात्रं ॥ तत्स्नेहात्
कृते तदन्नभोजनं न गृहवासश्चेदेकस्मिन् करोति तत्परं चान्यथा ॥ आचार्यं वाप्युपाध्यायं गुरुं वा पितरं च वा मातरं
वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनं कृत्वा पततीति नो तस्मात् प्रेतान्नं तत्र न भक्षयेत् ॥ अन्यत्र भोजनं कुर्यात्तच्चान्यैः स-
ह संवसेत् ॥ एकाहमशुचिर्भूत्वा द्वितीयेऽहनि शुध्यति ॥ ब्रतस्थो ब्रह्मचारी ॥ आचार्यादि स्वयं दग्ध्वापि तद्गृहे न भोजनं

नु

॥रुद्र०॥ रित्वा पतति ब्राह्मणो न विकारी भवति॥ तस्मात्तत्र तदुद्देशान्नं न भक्षयेच्च॥ तथा॥ दाहयित्वा तु मूल्येन शु-
॥२४॥ द्धेः तं भवेत्ततः॥ अशौचं दशरात्रं तु शिष्यस्येति च निश्चयः॥ वेतनादानेन परद्वारा यदा गुर्वादि-
24 दाहयेत्॥ तदा शिष्यस्य दशरात्रे मन्यथा त्र्यहं देवेत्यर्थः॥ तथा॥ यो ब्राह्मणो दहेत् दंभित्रं वाप्यन्यमेव वा॥
मोहाद्द्धा ततः स्नानः स्पृष्ट्वाग्निं प्राशयेद्घृतं॥ उपवासरतः पश्चात्त्रिरात्रेणाविशुध्यति। सर्वेषां स्याद्दहो-
रात्रं सर्वानुगमनादपि॥ शवस्पर्शविधानोक्तं विहितं सार्ववर्णिकं॥ अत्र ब्राह्मणस्य शूद्र... दाहे पात्रिरा-
त्रादिकं तु कं॥ तत्तु त्र्यात्रादिरूपस्य शूद्रस्य दाहदृष्टं॥ संबंधिरहितशूद्रदाहे तदशौचं तुल्यमेव
शौचं॥ ब्राह्मणवदुक्तं सर्वेषां सर्वानुगमनं अहोरात्रं शवस्पर्शविधानोक्तमिति प्रकारान्तरोपसंहारः॥ तद-
प मत्र व्यवस्था॥ ब्राह्मणस्य धर्मबुद्ध्या अनाथमृतब्राह्मणो दहने तथा विधि ब्राह्मणदाहे च स्नानमात्रेण शुद्धिः॥
तथा॥ विधमृतब्राह्मणानुगमने स्नानानंतरमग्निस्पर्शनघृतप्राशनेकृते शुद्धिः। यदि घृतप्राशनं न भवति।
तदा नमहोरात्रे व्याप्य शुद्धिः। उदासीनस्य स्नेहेन दाहे एकरात्रमशौचं॥ मातुलमातुलपुत्रमातुलानी
मातृष्वसृभगिनीभागिनेयमातामहमातामहीदौहित्रभगिनीपतिजामातृश्वशुरश्वश्रूश्यालकशिष्योचार्याचार्य ॥वि०॥
पत्नीगुरुपत्नीगुरुपुत्रराजपुरोहितस्यमातुर्मातुलमातृष्वसेयमातुः पितृष्वसेयमातुर्मातृष्वसेयपितुः ॥२४॥

पितृष्वसृमातुर्मातुलपुत्राणां दाहादौ कृते त्रिरात्रं॥ दाहादि कृत्वा मृतसंबंधिगृहे यो वसति तत्सिद्धान्नं वयो
भुंक्ते तस्य आत्युक्तमशौचं॥ यस्तु मृतसंबंधिगृहे वसति तदन्नं भुंक्ते यो वा तदन्नं भुंक्ते तद्गृहे न वसति तस्य
त्रिरात्रमशौचं॥ यो बुद्धिपूर्वकं परस्याशौचे ऽन्नमश्नाति तस्य तदशौचं समानमेवाशौचं शेषे वस्नानं॥ प्रमाद
तो ऽशौचान्नभोजने दोषाभावः॥ दुर्भिक्षे बुद्धिपूर्वकमपि यावदशौचान्नमश्नाति तावदेवाशौचमशौचापगमना
नंतरं त्रिरात्रं दुग्धमात्रपानरूपं प्रायश्चित्तं॥ मूल्येन प्रेतस्य वहनं ययोः कृतयोः तज्ज्ञात्युक्तमशौचं॥ ऽशौचिपि:स
ह शयनासनालिंगनानां गसंवहनानि कृत्वा तज्ज्ञात्युक्ताशौचं॥ शिष्यस्य गुरूपाध्यायाचार्यदाहमूल्येन परदाहकारि
ते दशरात्रमशौचं॥ ब्रह्मचारिणः पित्रादिदाहं कृत्वा एकरात्रं॥ क्षात्रियादीनां चानुवर्तानुगमने ऽहोरात्रं॥ ब्राह्मण
स्य क्षत्रियवैश्यशूद्रानुगमने ऽहोरात्रं प्रसंगेन शूद्रस्यानुगमने त्रिरात्रं स्नानादि तस्य शीघ्रं प्राशनैः शुद्धिः॥
पारस्करः॥ अस्थिसंचयनादर्वाक् यदि विप्रो ऽश्रु पातयेत्॥ मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति॥ अस्थिसंचय
नादूर्ध्वं मासं यावद्द्विजातयः दिवसेनैव शुध्यंति वाससा स्नानेन च॥ स्वज्ञातौ दिवसेनैव॥ आचार्यपत्नी गुरुपत्नी गुरु
पुत्र त्याज्य याचिहः मातुर्मातुलमातुर्मातृष्वसृश्च मातुः पैतृष्वस्रेय मातुः मातृष्वसृमातुः पितृष्वसृमातुलधोलन्य
क्षत्रियवैश्ययोः मासं यावद्दिनि शूद्र शौचकालं व्याप्येत्य पर्यः स्च ते शूद्रस्य से नापनर्यः॥ शूद्रस्य सदेसपिंडेमृते

इति प्रसंगेन शूद्राद्यानुगमने ५

॥शु०॥
॥२शु॥
॥२५॥
२५

ऽश्रुपातके एकाहः॥ शूद्रेण तेऽश्रुपाते तु क्षत्रियवैश्ययोर्द्व्यहात् शुद्धिः॥ तथा मनुः स्य यावदस्थीनि ब्राह्मणस्य हृतान्यपि
तावद्यो बान्धवस्तत्र रोति तेन द्व्यधवैः सह। स्नानान्तस्य भवेच्छुद्धिस्ततस्त्वाचमनं चरेत्॥ अबान्धवेऽश्रुजाते ब्राह्मणस्य। तत्स्नानाचमनमि
ति स्नानानन्तरमाचमनं चेत्यर्थः॥ तत्प्रा॥ ऽनस्थिसंचयनाद्विप्रो रोति चेत्क्षत्रियवैश्ययोः। ततः स्नानं सचेलं द्वितीयेऽनुविशुद्ध्यति॥ स्न
अनस्थिसंचिते शूद्रे ब्राह्मणो रोति चेत्त्र्यहात्। ततः स्नानं सचेलस्य शुध्यति वसेत्त्रिभिः। अस्थिसंचयनादूर्ध्वमहोरात्रेण शुध्यति॥
सचेलस्नानमन्ये बान्धवकृते ह्यस्थिसंचये कृते तु केवलं स्नानं क्षत्रविट्शूद्रजन्मनां सचेलस्नानमित्यादिना अकृते प्यस्थि
संचये यद्यन्येषां क्षत्रियादीनां शूद्रेण तेऽश्रुपाते सचेलस्नानं शुद्धिः। तत्र त्र्यहं जन्मनाभवपदेऽश्रुपातेऽहः क्षत्रियविशोरेकाहः
शूद्रस्य पूर्वोक्तं कूर्मपुराणे॥ अस्थिसंचयनादर्वाक् एकाहं क्षत्रवैश्ययोः। अन्यथा चैव सज्योतिर्ब्राह्मणे स्नानमेव चा इत्येकाह
विधानं। गुणवत्क्षत्रियवैश्ययोः मरणयोरश्रुपातने। विप्रस्य गुणहीनयोस्तयोः मरणेऽश्रुपातने द्वितीयेऽहनि पूर्वसंध्यापर्यन्तेन ब्राह्मणः
शुद्ध्यति॥ अनस्थिसंचयनादित्यादिवाक्येन पूर्वोक्तेन॥ अन्यथेति अस्थिसंचयने कृते सज्योतिः यदि दिवाऽश्रुपातनेन तद्दिनान्ते स
यदि रात्रौ तदा रात्र्यन्ते तेन शुद्धिरित्यर्थः॥ शुद्ध्येदित्यनुवर्तते॥ विष्णुः॥ सर्वस्यैव प्रेतस्य बान्धवैः सहाश्रुपाते कृते स्नानेन अकृते
स्थिसंचयने सचेलस्नानेन शुद्धः त्र्यहं जनमनभावपदेऽस्पि॥ तदपि प्रकरणार्थः॥ असपिण्डे ब्राह्मणे मृते ऽत्र्यहं गत्वा तद्बान्धवै ॥वि०॥
सहाश्रुपातनेऽनस्थिसंचयनात्पूर्वं कृत्वा सचेलस्नानेनाचमनेन च शुद्धिः ब्राह्मणस्य। अस्थिसंचयनादनन्तरं स्नानमात्रेण क्षत्रियमृते ॥२शु॥
॥२५॥

आदिवे मादशोगुरौ ~~दिपीनोदकं कुर्यात् ब्रतस्य समापनात्~~ मादिवा सुषुप्स इत्यादिको
ऽस्याशौचीति आदिशब्दो ब्रह्मचारी ब्रह्मपुराणे गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः
पश्चादशौचे पतिते न भवेदिति निश्चयः एवं मधुपर्कग्रहणात् पूर्वं अशौचोपनिपाते ऽशौचं
भवेत्यर्थः तथा गृहीतनियमस्यापि नस्यादन्यस्य कस्यचित् निमंत्रितेषु विप्रेषु प्रारब्धे
श्राद्धकर्मणि तथा नैष्ठिकस्याथवान्यस्य निवृत्तार्थ प्रस्थितस्य च वानप्रस्थस्य चान्यस्य
साधिकारस्य सर्वदा प्रतिग्रहाधिकाराच्च निवृत्तस्य न विद्यते॥ नैष्ठिकस्य नैष्ठिकब्र
ह्मचारिणः यावज्जीवं ब्रह्मचारिणः अन्यस्य तुर्याश्रमिणः अशौचिनिमित्ता ग्रहणे दोषाभा
वः उपकुर्वाणस्य तु ब्रह्मचारिणो गृहस्थस्य चांशौचिनिमित्ता ग्रहणे दोषः वानप्रस्थस्या
न्यत्र वनादन्यत्र ग्रामे साधिकारस्य निवृत्ताधिकारिणः अशौचिनिमित्ता ग्रहणे दोषाभावः
अन्यस्यापि सर्वप्रतिग्रहनिवृत्तस्य निवृत्तमात्रव्रतोरशौचिनिमित्ता ग्रहणे दोषाभावः जावलिः

श्रा॰वि॰
२६

ब्रह्मचारिणः स्वपेच चयस्तो श्रीलिनिर्दाहिते यज्ञे विवाहे सत्रे च सूतकं न कदाचन अन्यपते:
संन्यासिन एवात्यंतमशौचाभावः अन्येषां कालविशेषकार्यविशेषे चाशौचाभावो वाक्यांतरात्
वृद्धपुराणे अपि दानगृहीत्रोश्च सूतके मृतके तथा अविज्ञाते न दोषः स्यात् ज्ञाते दृष्टिं कुर्याच
न विज्ञाते तेनोत्कृष्टवस्यात्राप्यक्षितादिकं क्रमात् विज्ञाते चाशौचे सति पात्रं कृते तस्य नोत्कृष्टा
यश्चित्तमित्यर्थः तथा भोजनार्थं तु संभुक्ते विप्रे यदि तु विपद्यते यदा कश्चित्तदा शुद्धो दृशेषं त्यक्त्वा
समाहिताः आचम्य परकीयेन जलेन शुचयो द्विजाः विप्रे भोजनार्थं संभुक्ते सति दातुः श्वे
चेयदि विपद्यते म्रियते तदा भुक्तशेषं त्यक्त्वा द्विजाः परकीयेन जलेनाचम्य शुचयो
भवंतीत्यर्थः विपत्तेरुपलक्षणतया प्रसवेप्येवमेव ज्ञेयं तथा विवाहयज्ञयोर्मध्ये सूतके
सति चांतराशौचमन्नं परैर्देयं दातृन्भोक्तृश्च न स्पृशेत् परैर्देयादिति विवाहे यज्ञे च प्रवर्त
माने मध्ये सूतके मृतके च पतिते शौचमन्नं परैः परद्वारा दापयेत् एवं च दातृन्भोक्तृन्नस्पृ २८
शतां दोष इति विशेषः तथा दानविवाहयज्ञे च संग्रामे देशविप्लवे आपद्यपि च कष्टायां सद्यःशौ
चं विधीयते दानेन लाघुरू [illegible] ष्वे राजसंसर्गे चाशौचाभावः संन्यासे मृत

ऽस्थिसंचयादूर्द्धं। रोदने विप्रस्य ग्रहेन वैश्योपि ग्रहेत। ऽस्थिसंचयादूर्द्धं क्षत्रियवैश्ये चदिनमात्रं वा शू-
द्रमृते ऽस्थिसंचयात्पूर्वं रोदने विप्रस्य त्रिरात्रं। ऽस्थिसंचये कृते एकाहोरात्रं। क्षत्रिये वैश्ये मृते ऽस्थिसंचयात्पूर्वं
क्षत्रियवैश्ययोरश्रुपाते सचेलस्नानं। ऽस्थिसंचयादनंतरं स्नानमात्रं। शूद्रे मृते क्षत्रियवैश्ययोरस्थिसंचयात्पूर्वं द्व्य-
हेन॥ तदनंतरं दिनमात्रेण रात्रमात्रेण वा। शूद्रे मृते शूद्रस्याश्रुपाते ऽस्थिसंचयात्पूर्वमेकाहेन तदनंतरं सचेलस्नानं
यदि तु मृतगृहगमनमकृत्वैवाश्रुपातं जनितं तदा सर्वस्मिन्नवर्णे सवर्णे स्यास्थिसंचयात्पूर्वं सचेलस्नानेन तद-
नंतरं स्नानमात्रेण शुद्धिः॥ इति सपिंडाद्याशौचं॥ ऽप्रयानशौचिनस्तत्र प्रचेता॥ कारवः शिल्पिनो वैद्याः दासीदास
स्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः। कारा रजकवस्त्रपकारादयः। शिल्पिनश्चित्रकरस्वर्णकारादयः॥
वैद्याश्चिकित्सकाः॥ दासीदासाः कर्मकाराः। राजानो नृपतयः। राजभृत्या राजसेवकाः एते सद्यः शौचं। सद्यस्नानेनैव
शौचं शुद्धिर्येषामेवं भूतं ज्ञेयेति। एषामशौचं न भवत्येवेत्यर्थः॥ ऽस्मिन्प्रकरणे सद्यः शौचं स्नाव्येन शौचाभाव ए-
वोक्तः शुद्धिरत्नाकरे। ऽप्रजं चाशौचाभावे कारुप्रभृतीनां प्रतिनियत एव हव्यशिल्पादौ कार्ये स्पृश्यप्रतिषेधरू-
पो ज्ञातव्यः॥ ननु सर्वे बुदानमार्द्धानि धर्मकृत्ये शौचाभावः। तत्प्राचविवेकात्। ऽप्रशौचान्तरा ज्ञां राजकर्मणि न व्रतेति॥

।।मु०।।
३२६।।
२६/२

ऽग्नेत्वक्षत्रियाणां सत्त्रेण ।। कारूणां स्वकर्मणि राज्ञा माज्ञाकारिणा ।। न देवप्रतिष्ठाविवाहयोः पूर्वसंभृत
यो ।। अतिनामारब्धयज्ञानां सत्रिणां दानेकृतसंकल्पानां देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः प्रारब्धयोः ३ ।।
एवं कर्मविशेषे ।। शौचाभावविधेरपात्रसंध्यावंदनादिकादन्यकर्माणि । स्वजात्युक्तमेषामशौचं भवति एते ।।
छंदोगपरिशिष्टे ।। कात्यायनः ।। न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं प्रति ।। न शौचं कर्मणां तेस्यात् यह वा ब्रह्म
चारिणां ।। सूतक इति मृतकस्याप्युपलक्षणं ।। ब्रह्मचारी सूतके शौचे स्वकं कर्म ब्रह्मचर्याश्रमविहितं कर्म
न त्यजेत् यज्ञदीक्षणात्परं । दीक्षणात्पूर्वं नान्यतरमशौचे सति स्वकं कर्म न त्यजेत् पाकयज्ञ दीक्षणात्पूर्वमशौचे
वतैयज्ञप्यशौचं भवतीति एतेन्यर्थः । तपस्वी कृच्छ्रादि तपस्वी रत्न स्वकं कर्म न त्यजेत् । एतदप्यशौचाभावविधा ।।
नं कर्मविषयमेवा । कर्मान्तरे च शौचमेव एषां कर्माणां ते ब्रह्मचर्यदीक्षातपोरूपस्थाने स्वजात्युक्तमशौचं
भवति ।। ब्रह्मचारिणः पुनः पित्रोरपि मरणे ब्रह्मचर्यावसाने ऽपहमेवाशौचं भवति ।। यदाह मनुः ।। आदिष्टी
नोदकं कुर्यात् आव्रतस्य समापनात् ।। समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत् ।। आदिष्टानो ब्रह्मचारिणः शौचं न भवति
काद्यापत् । यदि ज्ञातासाभावेन प्राणनाशसंभाव्यमाने प्रतिग्रहे कर्तव्ये सूतकं न भवतीत्यर्थः । यमः । देवेभयेसमुत्पन्ने प्रजानां

।।वि०।।
३२६।।

ऽपविनाशिते। पूर्वसंकल्पने चार्थे तस्मिन्नाशौचं न विद्यते। दैवेभये दुर्भिक्षे उपसर्गमरणादौ ज्ञाने। प्रधानांगे प्रजाप
तौ पवरचक्रेण नाशिते राष्ट्रे उपप्लवे सत्यप्यशौचं स्वस्य ज्ञातुः कं न भवतीत्यर्थः।। पूर्वसंकल्पितं यत्किंचित्पुष्कर
णीत्यादि धर्मकार्यमशौचात्पूर्वमारब्धं तत्र सर्वत्र जननमरणे सत्यप्यशौचं न भवतीत्यर्थः।। अत्र च समस्त एव
प्रकरणे तत्कार्यविशेषएवाशौचाभावो न सर्वकार्याशौचाभाव इत्यवधेयं ध्यातव्यं।। इति श्रीमहोपाध्यायश्री
रुद्रकृतौ शुद्धविवेके जननमरणाशौचशुद्धिपरिच्छेदः।।१ अथाधिकारिणः।। तत्र हारीतिः।। मृते पितरि पुत्रे ग
क्रियाकार्या विधानतः।। वसिष्ठः। बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः। सर्वेषां मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्ये
ण चाविभक्तेन तु सर्वैरेव कृतं भवेत्।। पुत्रेण द्वादशविधपुत्रे।। तत्र ज्येष्ठ प्रसंसा यदि तु तस्यासन्नादिनाऽनधि
कारस्तदानि मृतकाले कर्तव्येषु।। औरसश्राद्धेषु कानिष्ठस्याप्यधिकारः।। तदभावे पुत्रिकापुत्रस्य तयोरभावे दत्त
कादीनां नाधिकारः पूर्वपूर्वाभावे उत्तरोत्तराणां।। तथा च मनुः।। आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतः।।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना।। पुत्रलक्षणमग्रे वक्ष्यते। सपिंडीकरणं यावत् प्रेतश्राद्धानि षोडश। पृथग्नै
व सुताः कुर्युः पृथग्द्रव्या अपि च क्वचित्।। छन्दोगपरिशिष्टे।। कात्यायनः।। पितामहपितुः पश्चात्पंचत्वं यदि गच्छति। पौ
त्रेण षोडश श्राद्धादि कर्तव्यं श्राद्धषोडशं। नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः।। विष्णुपुराणे। पुत्रः पौत्रः प्रपौत्रो वा तद्वं
तत्राप्यौरसस्याप्यधिकारः ५

मातृसंततिः॥ सपिंडसंततिर्वापि कृपा हीनप्रजापते। एषा प्रजा वै सर्वेषां समानोदकसंततिः॥ मातृपक्ष
सपिंडेन संबंधो योज्ञतेन च। मातृसंततीरपि त्रयाणां तासां संततिश्चेति द्रष्टव्यं॥ मातृपक्षस्य सपिंडेन संबंधो
मातृसपिंडकः॥ मातृपक्षस्य ज्ञातेन संबंधो मातृपक्षस्य समानोदक इत्यर्थः॥ कुलद्वयेपि वोच्छिन्ने स्त्री
भिः कार्याः क्रियाः नृप॥ संघातांतर्गतैर्वापि कार्याः प्रेतस्य तत्कृपा। उच्छिन्नबंधोर्हि... कारयेदवनी
पतिः॥ स्त्रीभिरिति। यथाविधिपरिगृहीताभिः सपत्नीतर्गतैरिव। देशप्रसिद्धतानां सार्थागर्गतैरित्यर्थः॥
उच्छिन्नबांधवो यस्य स उच्छिन्नबंधुस्तस्य हृक्थाद्धनात्॥ कृपा पंचमी। तेन सर्वबंधुहीनस्य धनं प्र
दापकस्येचित्रधाराः न दौहित्रं कारयेदित्यर्थः॥ नृपा॥ पूर्वाः कृपा मध्यमाश्चैव तथा चैवोत्तरास्त
था॥ त्रिप्रकाराः कृपाश्चैव तास्तासां तेदानं मणवृत्तं। गादाहात्तु वार्याप्पुत्यादिशय शर्मा... स्त्रयाः ते
याः तथा पूर्वा मध्यमा मासि मास्यैकोद्दिष्टसंज्ञका। ...तेपित्रत्वत्वप्राप्य ...सपिंडीकरणादनु॥ क्रियं ते या
...याः पित्र्याः प्रोच्यंते ताः नृपोत्तराः। तत्रविभागमाहः स एव। पितृमातृसपिंडेस्तु समानसंततैस्तथा॥
तत्संघातगतैर्वापि राज्ञा वा धनहारिणा॥ पूर्वाः क्रियास्तु कर्तव्याः पुत्राद्यैरेव चोत्क्रमात्। दौहित्रैर्वा
नरश्रेष्ठ कार्यास्तत्तनयैस्तथा। नते ...च कर्तव्याः स्त्रीणामप्युत्तराः क्रिया प्रतिसंवत्सरं यावदेकोदि

यक्षि । ध्यानतः ॥ दौहित्रे इति पुत्रिकापुत्रविषयमिति कल्पतरुः । जो नमः ॥ पुत्राभावे सपिण्डाः मातृ
सपिण्डाः शिष्याश्चाददद्युः तदभावे ऋत्विगाचार्यौ ॥ एते च भ्रात्राद्यभावे सति द्रष्टव्यं तथा च प्रचेताः । पुत्रो भ्रा
ता पिता वापि मातुलो गुरुरेव च । एते पिण्डप्रदाः स्युर्ज्ञेयाः सगोत्राः सैव बान्धवाः ॥ भ्रातेत्यत्र विशेषो यदा तात्का
निश्चयमविभक्तेता तेन पुत्रपत्न्यभावे कनिष्ठभ्रातुरधिकारः । तदभावे ज्येष्ठस्य तदभावे पितृपुत्र ज्ञेपु
त्रस्य पिता दद्यान्नानुजस्य तथाग्रजः ॥ इति छन्दोगपरिशिष्टवचनं ॥ तत्र भ्रातृसंभवे रन्नाधिकारबोधकं कनि पितु
ष्ठभ्रातृसंभवे ज्येष्ठभ्रातुरनाधिकारबोधकं । श्लोकः । पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रियाः पुत्राभावे तु प
स्या त्नी स्यात्पत्न्यभावे तु सोदरः ॥ भार्यापिण्डं पतिर्दद्याद्भर्तुर्भार्या तथैव च ॥ श्वश्र्वादेश्च स्नुषा चैव तदभावे सपिण्डकः ॥
अपुत्रायाः पत्न्याः पिण्डं पतिर्दद्यात् ॥ चतुर्न भार्यायाः पतिर्दद्याद् पुत्रायाः अपि क्वचिदिति । कात्यायनवचनं । तदप
रणीतभार्यादिविषयं ॥ तस्यादपि पूर्वपतिसद्भावे उत्तरस्यानाधिकारः ॥ तदभावे त्वनन्यगामिन्या उत्तरस्याप्यधि
कारः ॥ ब्रह्मपुराणे ॥ कदाचिन्न स्वजातीयः श्राद्धकार्ये न जायते । असमानो ज्ञातस्यापि कर्तव्यं पिण्डं सवर्णिनः ॥
श्राद्धं तु मातापित्रोर्निर्नुतनं करोति सः ॥ नित्यं गुरुकुलस्थस्य गुरुः सब्रह्मचारिणः ॥ सर्वेषामपि क

॥ श्रु ॥ नानामेकस्यैव पुत्रवान् भवेत्॥ सर्वास्ते नैव पुत्रेण पुत्रिणो मनुरब्रवीत्। सर्वासामपि पत्नीनामेका वं पुत्रिणी भव
॥२२॥ सर्वास्ते नैक पुत्रेण पुत्रिण्यो मनुरब्रवीत्। इत्यतिदेशेन मातापि सपत्नीपुत्रे पत्युरेवाधिकारः॥ एवं चैवं पितृरूपा
28 वीसपत्नीमातुः स्वपुत्रत्वातिदेशे किंफलमिति वाच्यं पुत्रत्वातिदेशेन पुन्नाम्नो नरकत्राणाभावस्य सपत्नी
स्य पुत्रत्वे सपिंडनसंभवस्य च फलस्य विद्यमानत्वात्। तथा॥ दत्तानां चोपदत्तानां कन्यानां कुरुते पिता। चतु
र्थेऽहनि तास्तेषां कुर्वीरन्नुत्सु समाहिताः॥ दत्तानां वाऽदत्तानां तामामित्यपर्ः॥ मातामहानां दौहित्राः कुर्वन्त्यहनि चाप
रेते चिवेषां प्रकुर्वीति द्वितीयेऽहनि सर्वदा॥ जामातुः श्वशुरास्तु स्नेषां तेपि च संयताः॥ मित्राणां तदपत्यानां
श्रोत्रियाणां गुरोस्तथा। भाजनपाकानां तु सर्वेषां चापरेऽहनि॥ श्राद्धं कार्यं तु प्रथमे। स्नात्वा ज्ञात्वा तत्तत्रिका।
राज्ञो मृतेऽसपिंडेऽनुत्तिरपायो पुरोहितः। मंत्री वा तद्दशौचं तु राचीत्यंचिकरोति सः॥ अग्नौ दौजामात्र भ नीनां स ॥ हिन्द्र
पिंडमात्रेऽधिकारः॥ तेषां चाद्विनीपाद्दि श्राद्धविधानं। चा। स्त्रीणां संचयश्राद्धपरं। गाद्य श्राद्धेष्टु। केषुर्ण
दिनाद्यं वा कर्तव्या। अधिकारः संबंधे सति त्रिरात्रमेनादौ लादिकरणे त्रिरात्रामशौचाभिधानं। दाहाद्यकरणे ॥ वि ॥
तूपके तं॥ स्वस्माशौचापजामे दौहित्रादि मेराया श्राद्धं कर्तव्यं॥ तथा च॥ जाकम ... पचतीनां ॥२२॥

न करोति कदाचन ॥ कामात्क्रोधाद्भयान्मोहात्कृत्वा न स्वामितं ऊर्जेन्ता पुत्राः कुर्वन्ति विप्रा यत्र विद्
स्तु दयोनयः ॥ सन्तानार्थे न्यपुत्रे म्योन करोति कदाचन ॥ स्वयमाना कुरुते ते वांते पितृस्वाम्यस्व कुर्वते ॥
तथा ॥ ज्ञाता ऐतेन कर्तव्यं स्कन्दस्य त्यौर्ध्वदेहिकं ॥ स्कन्देनाज्ञातदानस्य विना पारस्रवा रिक्थाचित्स्व पारस्रव
स्तु ॥ पंचालाणस्तस्कन्दापौकामादुत्पादयेत्सुतं ॥ स्कन्दजापां वाप्य स्कन्दजां सर्वेपारसवो मतः ॥ स्कन्दस्य त्यर्थ
जाभार्या जातस्य पुत्रस्य पितृस्थाद्धयोनर्भवत्वाधिकारः ॥ दासीजाया दासजां वा भवशतैवचनात्तान्तथा ॥
ऽथ पुत्राभावे नर्डुः पालयानी ज्ञातिस्त्वथा ॥ यत्पै. चदद्यात्पिंडं कृतमर्वं तमेतनवा ॥ अत्र च प्रकरणे
ऽथ पुत्रस्य पुत्री सापि पिंडप्रदा भवेत् ॥ तस्याः पिंडानुदे शतान्याहकाहेनैव निर्दिशेत् ॥ इत्यादीनि वाक्या
नि पुत्राभावे दुहितुरधिकारः ॥ बोधकानि मितिरत्नाकरे व्यवस्थापितं तत्र ऋज्वक स्मृति सारक
तो स्त्री नुमतं ॥ तान्यासि द्धवन्तु ॥ पुत्राभावे पत्न्या स्तदभावे सहोदरस्यैवं चेवं मे वालिष नात्र ॥ व्यवह
रोक्ति तदुभयानुसारी ॥ अतो व्यवहारानुरोधेन रत्नाकरालिखितम युपेक्षितं ॥ अत्र च ॥ अदु
त्रस्य पापुत्री त्यादि वाक्यानि सपिंडाद्यभावे दुहित्राधिकार बोधकानीति व्यवस्था प्रजितं पं

॥श्रु०॥ च तत्तु प्रवक्तारविरोधेनापततीति तत्र यथा रत्नाकरस्मेव वचनस्य॥ मार्कण्डेयपुराणे। स्त्रीणामप्येवमेवैतदे
॥२९॥ कोद्दिष्टमुदाहृतं॥ सपिण्डीकरणं तासां पुत्राभावे न विद्यते। प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः॥ म
ता हनि यथान्यायं येन तासां यच्छ्राद्धे हितं॥ स्त्रीणामप्येवमेवेत्यादशेन संबन्धेन पितृव्यपत्न्या
दीनामेकादशाहादितादृशेन संबन्धेन पितृव्यपत्नीत्यादीनां स्त्रीणामपि तत्कार्यमित्यर्थः। तदेव प्रकरण
29 र्थः॥ मतस्य त्रिविधा क्रिया भवति पूर्वा मध्यमा उत्तरा पेतार्त्रि॥ तदाह मार्कण्डेयः शौचान्तं यावत्पिण्डदानादि
का क्रियाः॥ पूर्वा ५० ज शौचापजमानन्तरमेकादशाहादि सपिण्डनपर्यन्तां मध्यमां तु द्वितीयमेकादश्यादि
रूपां उत्तरां तत्र षोडशविधानामपि पुत्राणां त्रिविधस्य स्वरूपस्याधिकारः॥ तेषु चौरसः श्रेष्ठः। तदभावे पु
त्रिकापुत्रः ततः पूर्वपूर्वाभावे उत्तरोत्तरोऽधिकारी तत्र औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नपौन
र्भवापविद्धदत्तक्रीतकृत्रिमस्वयमुपाजनपारशवाः। अत्र विभक्तानामविभक्तानां वा पुत्राणां मध्ये पू ॥वि०॥
र्वाणां मध्यमानां च रूपाणां योग्यस्य ज्येष्ठस्यैवाधिकारः॥ ज्येष्ठस्य पूर्वाभावेऽनाधिकारे निपतनस ॥२९॥
मपकर्त्तव्ये त्वेकादशाहादिषु कानिष्ठस्याप्याधिकारः। उत्तरां क्रियां तु सर्वेषां समाधिकारः। पुत्राभावे
पौत्रोऽधिकारी तदभावे प्रपौत्रस्तदभावे पत्नी तदभावे सहोदरः। कानीयान् तदभावे ज्येष्ठस्तदभावे पिता सदभावे
भ्रातृपुत्रः

तदभावे पूर्वरूपायां मध्यमरूपायां च सपिंडा अधिकारिणः॥ तदभावे दुहिताधिकारिणी॥ तदभावे स
कुल्यास्तदभावे मातृसपिंडास्तदभावे मातृसपिंडा॥ कुलद्वयाभावे मातरः॥ तदभावे यथाकथंचित् परिग
हीता भिक्षिण्यः॥ तदभावे एकसार्थप्रयाताः॥ तदभावे राजा देशेन धनजाहकोऽधिकारी॥ पितृहीनौ पौत्रप्रपौ
त्रौ सपुत्रयोरपि पितामहप्रपितामहयोः पार्वणश्राद्धादि कारिणौ॥ मृतस्य कन्याविवाहे कन्यादाताप्य
स्युदपकेऽधिकारी॥ अप्रसमाप्तषड्वर्षस्य पूर्वक्रियामात्रं॥ तत्र भ्रात्रपित्रादयोऽधिकारिणः॥ अप्रसमा
प्तद्विवर्षस्य पूर्वरूपापि नास्ति। किंतु भूमिखननमात्रं॥ तदूर्ध्वविवाहात् पूर्वं पूर्वक्रियामात्रं। तत्र
पित्राधिकारी। तदभावे पीतः॥ तदभावे सपत्नी। तदभावे स्नुषा॥ तदभावे पौत्रः॥ तदभावे सपिंडा
तदभावे सकुल्या॥ तदभावे पितृसपिंडाः॥ इति श्राद्धपंड्या॥ ऊढस्यापरिणीतस्य द्विवर्षादूर्ध्वं
पूर्वरूपामात्रं॥ तत्र भ्रात्रादिरधिकारी। परिणीतस्य त्रिविधा क्रिया॥ तत्र पुत्रादिरधिकारी॥ स

स्मृ० वि०
॥३०॥ 30

र्ववत्॥ केचन तु असमापूर्व दूर्ध्वस्य त्रैवर्णिकस्त्रीशूद्रयोः स्वापरिणीतयोः त्रिविधायपि त्रयो। अनुग
हादिना तत्त्वावश्यकीत्यादि प्राहुरिति॥ श्राद्धकल्पस्मृतिसारे॥ गुरुकुलस्य स्थितस्य शिष्यस्य आ
त्रपित्रभावे गुरुराधिकारी गुरोरपि पुत्रापत्नी भ्रात्रापित्रसहीतस्य शिष्यः। यत्रमातस्याभावे दु
न्विजिति॥ अथानधिकारिणः॥ तत्र याज्ञवल्क्यः॥ ब्रह्मचारिणः कुर्युरुदकं पतितानच॥
पाषंडमाश्रितास्तेनान अन्यानविकर्म्मिणः॥ गर्भभर्त्तृदुहश्चैवसुराप्यश्चैव योषितः॥ उदकं
शब्देनात्र प्रकरणे दाहादिकमपि लक्ष्यते। स्मृ साहचर्यात्॥ पाषंडो वेदप्रमान्यास्वीकर्त्तास्तेनोः ब्रा
ह्मणस्वर्णातिरिक्तविषयकचौर्यवत्तयः॥ ब्राह्मणस्वर्णहारिण। पतितत्वेनैव ग्रहणात्॥ ॥वि०॥
अन्याः स्वस्योपनयनकाले कृतोपनयनादिविकर्म्मिणः॥ आलस्यादिनां श्राद्धपावास्यकर्म ॥३०॥
त्यागिनो निंदितकर्मकर्त्तारश्च॥ सुराप्य इति मद्यपायकाः॥ एतच्च त्रैवर्णिकस्त्री विषयं। एतेच
ब्रह्मचारिप्रभृतयोऽन्यस्योदकन्नकुर्युः॥ ननु॥ आदित्यो नोदकं कुर्यादाब्रतस्य समापनात्॥

समाप्ते नूदकं कुर्यात्त्रिरात्रेणैव शुध्यति॥ आचार्यं स्वमुपाध्यायं मातरं पितरं गुरुं॥ निर्हृत्य तु व
व्रती प्रेतं न व्रतेन वियुज्यते॥ आदिशब्दाद्ब्रह्मचारीणां॥ न समाप्ते ब्रह्मचर्ये विना समावर्त्तनं॥
आचार्य उपनीय सांगवेदाध्यापकश्च॥ गुरुः स्मृ॥ अनुपनीय संपूर्णवेदाध्यापकः॥ उप
नीय वेदैकदेशाध्यापकश्च॥ उपाध्यायो यत्किंचिदध्यापकः॥ एतेषां मातापित्रोश्च वहन
दाहचादानव्यापारे ब्रह्मचारिणो दोषो न भवति॥ वसिष्ठः॥ ब्रह्मचारिणः शवकर्मणा व्र
तान्निवृत्तिरन्यत्र मातापित्रोर्गुरोर्वा॥ गुरुशब्देनाचार्योपाध्याययोरितिग्रहणं॥ अथोदकाद्य
नर्हाः॥ तत्र मनुः॥ वृथासंकरजातानां प्रव्रज्यासु च तिष्ठतां॥ आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रि
या॥ वृथाशब्दः सर्वत्राभिसंबध्यते॥ वृथासंकरजाताः॥ अयथाविधानसंकरजाताः॥ वृथाप्रव्रज्या
अवेदविहिता प्रव्रज्यासु वृथा॥ आत्मत्यागिनः॥ शास्त्राविहितशरीरत्यागकर्त्तारः॥ तथा॥ पाषं
डमाश्रितानां च भ्रुवतीनां च कामतः॥ गर्भभर्तृद्रुहां चैव सुरापीनां च योषितां॥ उदकक्रिया निवर्त्ततेइति

॥स्मृ०॥
॥२१॥
३

संबंधः॥ अथ पुत्रलक्षणं॥ नारदः॥ औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च॥ कानीनश्च सहोढश्च गूढोत्प-
न्नस्तथैव च॥ पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा॥ स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः॥ याज्ञव-
ल्क्यः॥ पिंडदोंशहरश्चैषां पूर्वाभावे परः परः॥ तत्रौरसलक्षणं॥ तत्राह विष्णुः॥ अथ द्वादश पुत्राः
भवंति॥ स्वे क्षेत्रे स्वयमुत्पादितः प्रथमः पुत्रः॥ मनुः॥ संस्कृतायां च भार्यायां स्वयमुत्पादये-
त्तु यं॥ तमौरसं विजानीयात्पुत्रं प्रथमकल्पितं॥ देवलः॥ सवर्णायां संस्कृतायां स्वयमुत्पा-
दितमौरसं पुत्रं विद्यादिति॥ सवर्णा समानवर्णा॥ अत्र तु सावर्ण्यं द्विजातित्वेन विवक्षितं॥ यदि
वा अलक्षणत्वात्तदि नैव सावर्ण्यं विवक्षितं स्यात्तदा आलक्षण्यस्याविवाहितयोः क्षत्रियवैश्ययोः स्वय-
मुत्पादितः॥ सुतः औरसो न स्यात्॥ पुत्रो दारेषु च तस्यात्तमीर्धीनास्येव॥ अतस्यौरसत्वमेव॥ तेन
शूद्रामात्रस्याजायसवर्णाग्रहणमिति॥ पारिजातः॥ आपस्तंबः॥ विवाहितासु आलक्षण्यां क्षत्रियवैश्य-
जातीयासु भार्यासु स्वयमुत्पादितः पुत्र औरसः॥ अथ क्षेत्रजलक्षणं॥ विष्णुः॥ नियुक्तायां सपिंडेनोत्तम- ॥वि॥
॥२१॥

तल्पं कल्पेत तत्र जातः प्रमीतस्य मृतस्य क्लीबस्य नपुंसकस्य व्याधितस्यापत्योत्पादनप्रतिबंधकदुश्चिकित्स्यरोगवतः २
यद्गोत्रेणोत्पादितः क्षेत्रजो द्वितीयः ॥ मनुः ॥ यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ॥ स्वधर्मेण
नियुक्तायां स क्षेत्रजः स्मृतः ॥ स्वधर्मेण च ताभ्यनुज्ञात्वादि नानियुक्तायां स्वगुर्वादिभिरनुज्ञातायां १ति
नदयमर्थः ॥ मतस्यां क्षामस्य वा भार्यायां पतिस्वगुर्वादिनियोगेन देवरेणान्येन वा स्वजातीयेन घृता
दिनियमादिमतोत्पादितः क्षेत्रजः पुत्रः स च क्षेत्रिण एव ॥ यदा तु निरपत्यो देवरो द्विरजयदपत्यं भविष्यति
तत्क्षेत्रिणो मम च समानं भविष्यतीति व्यवस्था ॥ यान्वपत्यमुत्पादितवांस्तदा स पुत्रो द्वयोरपि बीजिनः क्षे
त्रिणः सपिंडो भवति ॥ तदाह मनुः ॥ क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते । तस्येह भागिनौ दृष्टौ बीजी क्षे
त्रिक एव च ॥ अथ पुत्रिकापुत्रलक्षणं ॥ विष्णुः ॥ यस्त्वस्याः पुत्रः स मे पुत्रो भवेदिति । या पित्रा दत्ता सा पु
त्रिका पुत्रविधया प्रतिपादिता । पि भ्रातृविहीना पुत्रिकैव ॥ वशिष्ठः ॥ अभ्रातृकां प्रदास्यामि तुभ्यं क
न्यामलंकृतां ॥ अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ॥ मनुः ॥ अपुत्रोनेन विधिना सुतां कुर्वीत पुत्रिकां
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरं ॥ श्राद्धादिकरमित्यर्थः ॥ तदेव व्यवस्था या पित्रा दत्ता । चिंतिता स
तीनदत्ता सापि पुत्रिका तस्याः पुत्रः पुत्रिकापुत्रः औरससान्नुवत्नौ ॥ याज्ञवल्क्यः ॥ तत्समः पुत्रिकापुत्रः ॥ औरस स

पाव

॥श्रु॥
॥३२॥

तुल्यः इत्यर्थः॥ स च मातामहस्य पिंडप्रदः॥ अस्याह देवलः॥ अकृता च कृता वापि यं विंदेत्सदृशं सुतं।पुत्री
मातामहस्तेन दद्यात्पिंडं हरेद्धनं।मातामहस्येति शेषः।यदा तु पुत्रिकापुत्रस्यापि तन्मातामहो निरपत्यो न ह
तयोरपि श्राद्धकारी।तदाह देवलः॥तत्तुल्यः पुत्रिकापुत्रो दायदः सोप्यवामवेत्॥पितुर्मातामहस्यापि
निरपत्यस्य पुत्रवत्॥ मनुः॥ मातुः प्रथमतः पिंडं निर्वपेत्पुत्रिकासुतः॥ द्वितीयं तु पितुस्तस्यास्तृतीयं
तत्पितुः पितुः॥ अथ पौनर्भवलक्षणं॥ विष्णुः॥ चतुर्थः पौनर्भवः। या तु पत्या परित्यक्ता विधवा स्वे
च्छया यदा॥ उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते॥ पुनर्भूत्वा पुनः पुरुषान्तरेण सवर्णेनात्मानं
विवाह्य पुत्रमुत्पादयेत्स पौनर्भवः॥ याज्ञवल्क्यः॥ क्षतायां वाक्षतायां वा जातः पौनर्भवः सुतः॥ का
त्यायनः॥ क्लीबं विहाय पतितं या पुनर्लभते पतिं। तस्यां पुनर्भवो जातो व्यक्तमुत्पादिकस्य सः॥ अथ
कानीनः॥ तत्र विष्णुः॥ कानीनः पंचमः॥ तथा॥ अदत्ता दुहिता यस्य पुत्रं विंदेत तुल्यतः॥ पुत्री मातामह
स्तेन दद्यात्पिंडं हरेद्धनं॥ या पितृगृहे संस्कृता कामादुत्पादयेत्सुतं स कानीनो मातामहस्य भवतीत्याह॥ ॥वि॥
मदेह कन्यादशायामेव॥ सवर्णेन यः पुत्रः उत्पादितः स कानीनः॥ मातामहस्यैव श्राद्धकारी। यदि तु तस्याः ॥३२॥

परिणेतुर्निरपत्यो भवति तदा तस्यापि श्राद्धकारी स॥ तथा च ब्रह्मपुराणे॥ अदत्तायां तु यो जातः सवर्णेन पितुर्
गृहे स कानीनः सुतस्तस्य यस्मै सा दीयते पुनः। यदि तु कानीनस्य मातामहन्निरपत्यः कन्यापरिणेता निरपत्यो
तदा द्वयोरपि श्राद्धकारीति पारिजातः॥ अथ गूढोत्पन्नः॥ विष्णुः॥ गूढोत्पन्नोऽष्टमः॥ यस्य तल्पजस्तस्य तल्पजस्त
स्यासौ॥ मनुः॥ उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य चित्। स गृहे गूढोत्पन्नस्तस्य स्याद्यस्य तल्पजः॥
तल्पं दाराः॥ यस्य तल्पे यो जातस्तस्य भार्यायां जातस्तत्पुत्रः स भवति॥ वीजिनोऽपरिचयान्नात्र जातीयश्चासौ यदि
हीनजातीयसंगमसंका न भवति॥ तत्र कन्याकार्या उपयुक्त एव भवति। इति रत्नाकरः॥ अथ सहोढः॥
विष्णुः॥ सहोढः स नवमः॥ या गर्भिणी संस्क्रियते तत्सुतः सहोढः स च परिणेतुरेव भवति॥ अथ दत्तकः॥
विष्णुः॥ दत्तकश्च दशमः॥ स च मात्रापित्रा वा यस्य दत्तः॥ तस्य [illegible] स्यादिति शेषः॥ तथा॥ मातापितरौ दद्यातां
यमद्भिः पुत्रमापदि। सदृशं प्रीतसंयुक्तं स विज्ञेयो दत्रकः सुतः॥ आपदत्र ग्रहीतुः पुत्राभावे सदृशं सव
र्णं ये मातापितरौ प्रीतिसंयुक्तौ दद्यातां स दत्रिमो दत्रिकः पुत्रः। प्रीतसंयुक्तो वि[illegible]ति वचनात् भयलोभा
दिना दाननिषेधो वोच्यते॥ वसिष्ठः॥ शुक्रशोणितसंभवो मातापितृनिमित्तकः पुत्रस्तस्य प्रदानविक्रयत्यागे

मनुः या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती वोढुः स गर्भो भवति सहोढ इति चोच्यते विवाहकालीनहोममंत्रैः ५

सति संतानापसर्वेषां नतु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा १

॥प्र॥ शुभ्रा मातापितरौ प्रभवतः॥ न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः॥ पुत्रप्रतिगृहीष्यन्बं
॥२३॥ धूनाहूय राजनि चावेद्य वेश्मनि चेत्यातस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरे बांधवसन्निकृष्टमेव प्रतिगृह्णी
33 यात्॥ अस्यार्थः॥ मातापित्रोः पुत्रदाने वाधिकारः पत्योः सतिस्त्रियाः पत्यनुमत्या पुत्रदानेऽनाधि
कारः॥ पत्यंभावेऽधिकार एव एक पुत्रस्य दानादौ द्वयोरप्यनधिकारः॥ पुत्रप्रतिगृह्णीयात्तुः प्रथमत एव
बंधूनाहूय राज्ञे च कथयित्वा स्वगृहमध्ये स्वगृह्योक्त विधिना अग्निस्थापनादि कृत्वा॥ आधारावा
ज्यभागमहाव्याहृतिभिः सर्वप्रायश्चित्त प्राजापत्या विष्टकृद्धोमान् स्यात् कृत्वा. तत्र आनेमिरेकव्याहृतिभिः
होमं कुर्यात्॥ ततो होमानन्तरं च संस्रावप्राशनादि पूर्णाहोमान्तं कृत्वा पुत्रं गृह्णीयात्॥ अदूरे बांधवस
न्निकृष्टं स्वजननात्पित्यर्थः॥ तदभावेऽसन्निकृष्टमेवाप्यर्थः॥ तेन तदभावे सन्निकृष्टमपीत्यर्थः॥
अपुत्रस्य जनितं बहुपुत्रान्तिवेदनं दिष्टार्थमेवान स्पर्शनं ग्रहणेति शंकत्वार्थः॥ न त्वदृष्टार्थाः तोऽनिवेदने
तेषां न धर्मकुलोपेषुः॥ एवं च व्याहृतिभिर्होमस्य प्रतिगृह्णीत्वाकृत्वा व्याहृतिभिः पाठे स्त्री शूद्रयोरनधिका ॥वि॥
रात्॥ स्त्रीशूद्रयोर्दत्तकः पुत्रो न भवत्येवेति॥ मनुः॥ क्रिकव्या जो त्रेजनयितुर्न हरेद्दत्तिमः सुतः॥ क्रिकव्यगोत्रो ॥२३॥

ग्राहकत्वं च भवति

गुणः पिंडोप्युपैति ददतः स्वधां ॥ अस्यार्थः ॥ तत्र तस्य जनकगोत्रं नावर्तति एतेन च तद्धने भागो भवति तज्जन-
कस्य पिंडदाने च दत्तकस्य नाधिकारः ॥ किंतु येन गृहीतस्तस्यैव पिंडश्राद्धादावधिकारः ॥ तद्धनगोत्रभाक् ॥ अथ
क्रीतः ॥ विष्णुः ॥ क्रीतश्च नवमः ॥ क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात् ॥ स तु । क्रीतः सुतस्त-
स्य सदृशोऽसदृशोपि वा ॥ अस्यार्थः ॥ मातापित्रोः सकाशात् क्रीणीयात् स क्रीतः पुत्रकर्तुरेव पिंडप्रदः ॥ स- स
दृशः सवर्णः असदृशोऽसवर्णः ॥ इति पारिजातः प्रकाशकारस्तु ॥ यद्यप्यसदृश इति सामान्येनोक्तं तथा-
पि हीनजातीयेनोत्तमजातीयः पुत्रो न कर्तव्यः ॥ उत्तमजातीयेन हीनजातीयोपि पुत्रो न कर्तव्योपि
सजातीय एव पुत्रः कर्तव्यः ॥ सदृशासदृशत्वं गुणापेक्षयेति मेधातिथिः ॥ स्वयमुपगतः ॥ स्वयं चोपग- स्वय
तो दशमः ॥ स च यस्योपगतस्तस्य पुत्र इति शेषः ॥ मनुः ॥ मातापितृविहीनो यस्त्यक्तो वा स्यादकार-
णात् ॥ आत्मानं स्पर्शयेद्यस्तु स्वयंदत्तस्तु स स्मृतः ॥ अकारणादनपराधात् मातापितृभ्यां त्यक्तो
मातापितृहीनो वा यः स्वयमात्मानं स्पर्शयेद्दद्यात् त्वं नाहं पुत्रो भवामीति एवं प्रकारेण स्वयमु-
पगतः ॥ पुत्रो भवति प्रतिग्रहीतुरेव पिंडप्रदः ॥ अथापविद्धः ॥ विष्णुः ॥ अपविद्धस्त्वेकादशः ॥

॥ गूढ० ॥ समात्रापित्रा वा परित्यक्तो येन गृहीतस्तस्य पुत्र इति शेषः ॥ मनुः ॥ मातापित्रा समुत्सृष्टं तयोरन्यतं

॥ २४ ॥ रेण वा ॥ यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥ मातापितृभ्यां परित्यक्तः ॥ व्यतिरेकेणान्तरेण सामर्थ्यादिनाप

त्र रित्यक्तो येन पुत्रत्वेन गृहीतस्तस्य सोऽपविद्धः पुत्रो भवति ॥ अथ कृत्रिमः ॥ मनुः ॥ सदृशं यं प्रकुर्वीत गु

णदोषविचक्षणं ॥ पुत्रं पुत्रगुणैर्युक्तं स ज्ञेयः कृत्रिमः सुतः ॥ अत्रापि सदृशं गुणज्ञ इति मेधातिथिः ॥ गुण श्राद्दप्रो

34 दोषविचक्षणं ॥ मातापित्रोरौर्ध्वदैहिके करणाकरणे गुणदोषौ बहुपुत्रगुणैः सुरूपादिभिः ॥ युक्तमेवंभूते दि

यं पुत्रं करोति स कृत्रिमः पुत्रः ॥ स च पुत्रत्वकरणस्य पिंडप्रदः ॥ मृतपित्रादीनां च पिंडप्रदत्वं तस्य निव

त्येव तत्र प्रकारः ॥ शुभे समये पुत्रकर्ता स्नातः किंचिदभीष्टं वस्तु दत्वा त्वं [illegible] मम पुत्रो भवेदिति वदेत्

तं च पुत्रोऽभूतोऽस्मि ॥ इति प्रतिवदेत् ॥ वस्तुदानमात्रमाचारप्राप्तं ॥ न त्वावश्यकं पुत्रकरणे च उभयोरनुमति

रेव प्रयोजिका ॥ तेन वाक्यविशेषस्य न पुरस्कारः ॥ अथ गूढजः पुत्रः ॥ विष्णुः ॥ यत्र क्वचनोत्पादितस्तु

गूढजः ॥ यत्र क्वचनेति ॥ कृष्णायामकृष्णायां वा सवर्णादुत्पत्तिस्त्वर्थः ॥ एवमेव रत्नाकरः ॥ एतच्च सवर्णा ॥ वि० ॥

पुत्रस्य सादृशत्वं कल्पितरस्मिन्वा ॥ वस्तुतो यस्य त्वरीदृशत्वमेव कृत्रिमस्यैव च इत्युक्तं वाक्येषु सादृशत्वेन पा ॥ ॥२४॥

ठः

विस्तुस्मृतौ तु क्रीत्रिम पुत्रः परिगणित एवेति ॥ तत्र शूद्रपुत्रस्य कादशात्वं ॥ मनुः ॥ यं ब्राह्मणस्तु शूद्रायां
कामादुत्पादयेत्सुतं ॥ स पारयन्नेव शवस्तेन पाराशवः स्मृतः ॥ पारयन्नेपि तत्त्वाभिमतस्य किंचिदुपकु
र्वन्नेव शवोल्पोपकारित्वात् ॥ पारशवः स च जनयितुः पिंडप्रदः ॥ एवं मनूक्त शूद्रजातस्य पुत्रस्य तनकशूद्र
श्राद्धदावतितरामधिकारः ॥ यत्र च शूद्रस्य विवाहिता भार्यास्ति तथाविधपुत्रश्चास्य तत्रापि स पुत्र एवाधि
कारी ॥ बृहस्पतिः ॥ पुत्रास्त्रयोदश प्रोक्ता मनुना ये न पूर्वशः ॥ संतानकारणं तेषामौरसः पुत्रिका तथा ॥ आद्यावि
नाशयथा तैलं सद्भिः प्रतिनिधिः स्मृतः ॥ तथैकादश पुत्रास्तु पुत्रकौरसयोर्विना ॥ अन्य वदन्ते त्रजाद्या ये कथि
तास्तथापि क्षेत्रजपौनर्भवकानीनसहोढगूढोत्पन्नाः कलौ न भवंति ॥ तेषां निंदितत्वेनाभिधानात् ॥
तथा च बृहस्पतिः ॥ अनेकधाः कृताः पुत्राः ऋषिभिर्ये पुरातनैः ॥ न शक्यास्तेऽधुना कर्तुं शक्तिहीनैर्नरैरिद
नीं ॥ तत्र निंदितान्परिगणयति ॥ क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः ॥ कानीनश्च सहोढश्च गूढोत्प
न्नस्तथैव च ॥ औरसपुत्रिकापुत्रयोरभावे दत्तकादयस्तु ज्ञाता एव ॥ तथा चाह [illegible] दत्तोपविद्धः क्रीतश्च स
कृतः शौद्रस्तथैव च ॥ जातिमुख्या [illegible] तेषां तावतांशो [illegible] पुत्रः ॥ इति त्रयोदशपुत्राणां लक्षणं

कृ.न

तु

॥स्मृ०॥ गप्य सपिंडादिलक्षणे॥ तत्र मनुः॥ सपिंडता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु जन्मनाम्नोर
वेदने॥ सप्तमे समानं तरं सपिंडता निवर्त्तत इत्यर्थः॥ शंखलिखितौ॥ सपिंडता तु सर्वेषां गोत्रतः सप्तपौरु
॥३५॥ षी॥ पिंडश्चोदकदानं च शौचाशौचं तदनुगं॥ गोत्रतः संतानात्॥ तदनुगं तेन सप्तमपुरुषावधेः स
35 संतानजातानां परस्परं सपिंडतेत्यर्थः॥ ब्रह्मपुराणे॥ सर्वेषामेव वर्णानां विज्ञेया सप्तपौरुषी। सपिंडता
ततः पश्चात्समानोदकधर्मतः॥ ततः कालवशात्तासां विस्मृतेऽन्यनामभिः॥ समानोदकसंज्ञा तु तावन्म
त्रोपि नश्यति॥ सुमंतुः॥ आ लक्षणानामेकपिंडस्वधा नाम दशमाद्धर्मनिवृत्तिर्भवति। आसप्तमादेकस्यावि
च्छित्तिर्भवति॥ अन्यथा पिंडांशो वा त्रिपादविच्छेदाद्द्रव्यस्य तत्तुल्यो भवति॥ एकः पिंडः स्वधासंबंधी येषां ते ए
कपिंडस्वधा तेषां दशमवधीकृत्य परतो धर्मनिवृत्तिरंशो वादि निवृत्तिरंशो वादि निवृत्तिः॥ अन्यथा चतु
र्थादर्वाक् पिंडनिवृत्तौ सप्तमात् पुरुषा दर्वाग् यद्यपि लिखितौ। एकादशादर्वागंशो च निवृत्तौ पापभाग्भव न्
ती त्यर्थः॥ मत्स्यपुराणे॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः॥ पिंडदः सप्तमस्तेषां सापिं ॥वि०॥
ड्यं साप्तपौरुषं॥ इदं प्रकारान्तरमेव॥ कूर्मपुराणे॥ अदत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषं॥ ॥३५॥

स्थात तीया स्वधाविच्छित्तिर्भवति ५ सप्तममवधीकृत्य परतो दायनिवृत्तिः तृतीयमवधीकृत्य परतः स्वधानिवृत्तिः ४

प्रजानां भर्तृसापिंड्यं प्राह देवः पितामहः ॥ अप्रजानामविवाहितानां प्रजानां विवाहितानां । एवं चरत्नाकरलि
खनौ । तद्वाक्यपर्यालोचनया यद्यपि वचनमप्रदत्तानां स्त्रीणां त्रिपुरुषमितिसापिंड्यप्रतिपादनं । तद्वाग्द
त्तानंतरविषयमितिप्रतिभाति । कन्यानामपि सप्तपुरुषावधि सापिंडत्वं व्यवहारात् ॥ अत्र च प्रकरणार्थः ॥ आ
शौचभागिनां सप्तमतस्य च प्रसूतस्य च बीजिपर्यंतस्य गणनया सप्तमपुरुषाभ्यंतरत्वे सपिंडता भवति । द
शमपुरुषाभ्यंतरत्वे समानोदकता भवति । सैव सकुल्यता भवति । ततः परमस्मात् पुरुषादयं जात इति ज्ञानाभावे
स्मात् कुलजात इत्येवमाकारज्ञानमात्र गोत्रजा इत्युच्यंते ॥ दशमपुरुषादनंतरं ज्ञायमानजन्मनामत्वे बांध
वपदव्यपदेशः ॥ पाक्षिणपशौचविधानं च प्रकरणांतरादेवेति ॥ इति महामहोपाध्याय श्रीरुद्रधरकृतौ शुद्धिवि
वेकेऽधिकारिनिरूपणं परिच्छेदः ॥ अथ देहादि द्रव्यशुद्धिः ॥ तत्र प्रथमं देहशुद्धिः ॥ यमः ॥ सत्यं शौचं तपः
शौचं शौचमिंद्रियनिग्रहः ॥ सर्वभूतदयाशौचं मृज्जलं चापि पंचमं ॥ बृहस्पतिः ॥ परापवादश्रवणं परस्त्रीणाम
दर्शनं । एतच्छौचं शौचं दर्शोर्जिकाशौचं मपेशुनं । प्राणिनामवधो स्तेयं शुचित्वं पादहस्तयोः ॥ असंस्पर्शः प
रस्त्रीणां शारीरं शौचमिष्यते ॥ अत्र राजजानापरावसवादपरस्त्रीणां दर्शनसंस्पर्शनानि वक्त्रि शौचमित्यर्थः ॥

तत्र

कर्णविट्कर्णमलं नखास्तु कृंतो एवमलं दूषिकानेत्रमलं बौधायनः आदद्दीत मृदोपश्च षट्सु पूर्वेषु शुद्धये २

॥शु०॥ मनुर्विष्णु ॥ सर्वेषामेव शौचानामर्थशौचं परं स्मृतं । योऽर्थे शुचिर्हि स शुचिर्न्न मृद्वारि शुचिः शुचिः ॥ मनुः ॥ वसा
॥३६॥ शुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः ॥ श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः ॥ उत्तरेषु च षट्सु द्भिः
३० केवलाभिः विशुध्यति । मरीचोत्सर्गे विष्णुपुराणे ॥ एका लिंगे गुदे तिस्रो दश वामकरे न्नपा उभयोः सप्त दा
तव्या मृदः शुद्धिमभीप्सता । उभयोः हस्तयोः सप्त प्रदेया वामहस्तपृष्ठे षण्मृत्तिका देया ॥ षड्वद्दति हारीत
मि तीत वचनात् ॥ यमः ॥ तिस्रस्तु पादयोः देयाः शुद्धिकामस्य नित्यशः । एतच्च प्रतिपादं तथा । तिस्रस्तु मृत्ति
पो: कादेयाः कृत्वा तु नखशोधनं । हस्तपादद्वयमिति शेषः । केवलमूत्रोत्सर्जे दक्षः ॥ एका लिंगे तु सव्ये त्रि
रुभयोर्मृद्द्वयं स्मृतं । सव्ये हस्ते उभयोर्हस्तयोरित्यर्थः ॥ जन्मपुराणे ॥ पादयोर्द्वे गृहीत्वा च तु प्रक्षालि
तपाणिना । स्वाचम्य च ततः शुद्धः स्मृत्वा विष्णुं सनातनं । पादयोर्द्वे इति प्रतिपादमेकैकं कामं देया ॥
बौधायनः ॥ मूत्रवद्रेतसः समुत्सर्जे शौचमिति शेषः ॥ शंखः ॥ मृत्तत्रे दक्षः ॥ मृत्तिका तु समुद्दिष्टा त्रिपर्वी
पूर्यते जया ॥ इदं मृत्तिकापरिमाणकथनं शुद्दे विहाय । अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता । द्वितीया ॥वि०॥
च तृतीया च तदर्द्धपरिकीर्तिता ॥ कूर्मपुराणे ॥ यस्मिन्स्थाने कृतं शौचं वारिणा तन्न शोधयेत् । न शुद्धिरस्त ॥३६॥

भवेन्नस्यमृत्त्रिकायोनशोधयेत्॥ मृत्तिकासंख्यमुक्तं॥ मनुः॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥
त्रिगुणं च वनस्थानां यतीनां च चतुर्गुणं॥ आपस्तंबः॥ आह्निके शौचं यथा प्रोक्तं निशयर्द्धं तु तद्दिष्यते॥ पथिपादस्तु वि
ज्ञेयः॥ आर्त्तः कुर्याद्यथाबलं॥ यथाति। यत्र मार्गविल्लवे सति चोरादितो न व्दंशकाभवति। तत्परं। आर्त्तो रोगी॥ यमः॥
संकर्द्दमास्तु वर्षासु प्रविश्य ग्रामसंकरं॥ जंघाभ्यां मृत्तिकातिस्रः पद्भ्यां द्विगुणाः स्मृताः॥ अपप्रक्षालिनादिशुद्धिः॥ ॥ अंगिरा॥
ऊर्द्धनाभेः करौ मुक्त्वा यदंगमुपहन्यते॥ तत्र स्नानमधः स्नातु क्षालनेनैव शुध्यति। इंद्रियेतु प्रातर्वस्यादमेध्यं
यदि कुत्रचित्॥ मुखेपि संस्पर्शगते तत्र स्नानं तस्यापि विष्ठोधनं विष्णुः॥ नाभेरधस्तात्प्रबाहुषु च कायिकैर्मलैः
सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदंगप्रक्षाल्याचांतेदितः शुद्ध्येत्॥ अन्यत्रोपहतो मृत्तोयैस्तदंगप्रक्षाल्या
स्नानेन शुद्धिः॥ चंद्रुष्युपहतं उपोष्य स्नात्वा पंचगव्येन दर्शने पहतस्य। प्रबाहुः॥ रध्योमाजः पंच कपोले
गव्येन प्राशितेन शुद्ध्येदिति शेषः॥ कृष्णाजः॥ मदधाविद्धं। मूत्राविमु द्धिः संस्पृष्टं मुखमंडलं॥ मृ
त्तिकागोमयैर्लेपात् पंचगव्येन शुद्ध्यति। विपुषः॥ अत्यंतमलविंदवः॥ शातातपः॥ रजकश्चर्मकृच्चैव व्या
धजालोपजीविनौ॥ चैलनिर्णेजकश्चैव नटः शैलूषकः स्मृतः॥ मुखे भगजस्तथा श्वा च वनितानां। सर्ववर्णिकः॥

॥प्रा०॥ चक्री ध्वजी वध्यघाती ग्रामकुक्कुटसूकरसौ॥ एभिर्यदंगं स्पृष्टं स्याच्छिरोवर्ज्यं द्विजातिभिः। तोयेन क्षालनं कृत्वा
॥३७॥ चांतः शुचितामियात्॥ गरजकोवस्त्ररंजनकर्त्रीनरो नर्त्तकः। शैलूषको नाटकाद्य। भनेतामुरवे भजो मुखो यो
37 निरिति प्रसिद्धः। चक्री तैलकः। ध्वजी शौण्डिकः। वध्यघाती चोरादिवधे नियुक्ताः। अत्र शिरःशब्देन नाभेरू
र्ध्वं लक्ष्यते। पैठीनसिः॥ उच्छिष्टे रेतो विण्मूत्रं संस्पृश्यान्त्यजमाचम्य प्रयतो भवति। त्रिः प्रक्षाल्य चांतं देशं
अत्र त्रिः प्रक्षाल्य। चम्य प्रयतो भवती। अन्वयः॥ देवलः॥ उच्छिष्टमानवं स्पृष्ट्वा भोज्यं चापि तथाविधं। तथै
व हस्तौ पादौ च प्रक्षाल्याचम्य शुध्यती॥ भोज्यं तथाविधं उच्छिष्टमेव भक्ष्यादि। यदंभः शौचनिर्मुक्ते
भाजि प्राप्य विनश्यति॥ प्रक्षाल्य शुचिर्लिप्तं च संस्पृश्याचम्य शुध्यति॥ शौचजलादि तन्मू
त्रि स्पृष्ट्वा मलाघ्रस्रवलिप्ताग्र प्रक्षाल्याचम्य शुध्यतीत्यर्थः॥ बौधायनः॥ नीवीं विस्रस्य परिधा
योपस्पृशेत्। उपस्पृशेदाचामेदित्यर्थः॥ विष्णुः॥ पंचनखं स्पृष्ट्वा स्नेहस्पृष्टं चामेत्। चांडा ॥वि०॥
लान्नं भावनेन च। पंचनखास्थि भक्षैस्तपंचनखास्थि॥ आपस्तंबः॥ रूक्षपाणिर्वा ॥३७॥
सेदुच्चम्याप्यपः स्पृशेत्। शक्तिविषये रूक्षपाणि स्नेहस्नेहवायसे पदिति॥

न्प

कर्तव्य

उद्धृत्य पाणिना चामेदित्यर्थः॥ हारीतः॥ देवगृहमभितं तु कामाऽऽचामेत्॥ तथा॥ नोत्तरेदनुस्पृश्य
जलपारजमनेपूर्वमाचम्य सिन्प्यापि इत्यर्थः॥ यमः॥ उत्तीर्योदकमाचम्य वतीर्य उपस्पृशेत्॥
एवं स्याच्छुचिसाम्युक्तो वरुणश्चैव पूजितः॥ मन्त्रं गिरो बृहस्पतिः॥ सुप्त्वा भुक्त्वा च भुक्त्वा च निष्ठी
व्य क्रान्तं च॥ पीत्वापोऽध्ययमानश्च आचामेत्प्रयतोऽपि सन्॥ दृष्ट्वाद्धिकात्वेत्यर्थः॥ ग
गाध्यायनादिकृत्वाद्विराचमनं कर्तव्यं॥ वेदाध्ययनपूर्वकाले च द्विराचमनमित्यर्थः॥ वायुपुराणे॥ निष्ठीव
नेतं पाध्यं उतथापादावसेचने। ज्ञाते उच्छिष्टस्पर्शं भाषादशूद्रव्यपहतस्य च॥ संदेहेषु च सर्वेषु शिखां
मुक्त्वा तथैव च॥ विनायज्ञोपवीतेनानित्यमेव उपस्पृशेत्॥ उच्छिष्टवायसस्पर्शे दर्शने चान्त्यजन्मनां॥
निष्ठीवनं मुखे श्लेष्मा त्यागः॥ निष्ठीवनादौ कृते आचमनं संदेहेषु चाचमनाचमननिमित्तेषु सत्ये
चाचमनं कर्तव्यं॥ शिखां मुक्त्वा विना यज्ञोपवीतेन इत्येताभ्यां शिखाबन्धनं॥ यज्ञोपवीतपरित्यागश्चाचम
नानिमित्तमित्युक्तं॥ तेन तत्प्रकरणान्तरं तु नवं बध्वा शिखां धृत्वा च यज्ञोपवीतं आचमनीयमित्यर्थः॥ संवर्त्तः॥
चर्मकारं रजकं वेणं धीवरं नटमेव च॥ एतान्स्पृष्ट्वा द्विजो मोहादाचामेत्प्रयतोऽपि सन्॥ अप्याचमनानुकल्पः॥

स्मृ०॥ मार्कंडेयपुराणे ॥ कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनं ॥ कुर्वीतालंभनं वापि दक्षिणश्रवणस्य च
॥३८॥ यथाविभवतो ह्येतत् पूर्वाभावे ततः परं ॥ अविद्यमाने पूर्वस्मिन्नुत्तरप्राप्तिरिष्यते ॥ वृद्धशातातपः ॥ वांत
38 कृमिलिनिष्ठीव दंतच्छेदे तथानृते ॥ श्रुतेपि तितसंभाषे दक्षिणश्रवणं स्पृशेत् ॥ अग्निरापश्च वेदाश्च
चंद्रादित्यानलस्तथा ॥ एते सर्वे हि विप्राणां श्रोत्रे तिष्ठंति दक्षिणे ॥ बौधायनः ॥ आर्द्रं तृणं वा भूमिं वा
गोमयं वोपसंस्पृशेत् ॥ अथाचमनापवादः ॥ भोजने दंतलग्नानि हृत्वाचमनं चरेत् ॥ दंतलग्नम
संहार्यं लेपं मन्येत दंतवत् ॥ न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः ॥ तत्रापि तमशौचं स्यात्त्रणा वै
धात्रुणे कृते ॥ आपस्तंबः ॥ न स्मश्रुभिरुच्छिष्टो भवत्यंतरास्ये सद्भिर्यावन्नो हस्तेनोपस्पृशति ॥ वशिष्ठः ॥ प्रवि
दंतवद्दंतलग्नेषु यच्चाप्यंतर्मुखं भवेत् ॥ आचांतस्यावशिष्टं स्यान्निगिरन्नेव तच्छुचिः ॥ यज्ञोपीतिः
आचमनानंतरमपि प्रमादतोऽवसिष्टपदनकणाद्युपलभ्यते ॥ मुखाभ्यंतरे तन्निगिरन्नेव शुचि ॥ वि०॥
र्भवति ॥ स्पर्शांतिबिंदवः पादौ यतः आचमतः परान् ॥ भूमिगास्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥ प्रणं
त्याचमतां यास्तु शरीरे विप्रुषोन्नृणां ॥ उच्छिष्टदोषो बुबोऽकूं नयंति ॥ नास्ति तत्र भूमितुल्यास्तु ताः स्मृताः ॥ ॥३८॥

१

पा स्मा:

मनुः ।। नोच्छिष्टं कुर्वते मुख्या विप्रुषो ऽङ्गं न यंति याः ।। मुख्या मुखभ[illegible] भवा विप्रुषो ऽङ्गं नयंति उच्छिष्टं
न कुर्वतीत्यर्थः ।। अंगं गतास्तु चाद्विरोमन्नोदने दन्तस्मास्वाचमनं । न पाचये ठीनसिः । द्विरोमन्नोदने ष्वा
चामेत् ।। अत्रांगिरसो । मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च । नोच्छिष्टस्तु भवेद्विप्रो यथा त्रे
र्वचनं तथा ।। अप्सु आपोशाने । एवमेव वच कल्पतरू । प्राणाहुतीषु च पंचग्रासाने ।। शातातपः ।।
दंतलग्ने फले मूले भक्ष्ये स्नेहे तथैव च । तांबूले चैक्षुदंडे च नोच्छिष्टो भवति द्विजः । फलेति क
कवाय्य जातीफलादेः समाचारादित्याहुः प्रमाणिकाः । भक्ष्ये कटुकवाये । मनुः । उच्छिष्टेन तु संस्पृ
ष्टो द्रव्यहस्तः कथंचन । अनिधायैव तद्द्रव्यमाचांतः शुचितामियात् । द्रव्यहस्तो द्रव्यादिहस्त एवाचांतः
शुचितां प्राप्नुयादिति रत्नाकरः । द्रव्यमात्रमन्नपानव्यतिरिक्तमित्याचारादर्शः ।। बृहस्पतिः । प्रचरे
चान्नपाने षु यदुच्छिष्टमुपस्पृशेत् । भूमौ निधाय तद्द्रव्यं स्पा[?] प्रदानं तथा ।। अरण्ये नुदके रात्रौ चोर
व्याघ्रकुले पथि । कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति । शौचं तु कुर्यात्प्रथमं पादौ प्रक्षालयेत्ततः ।
उपस्पृश्य ततः पश्चाद्दुष्टं हीनं शुचितामियात् ।। आपस्तंबः । कृत्वा मूत्रं पुरीषं च द्रव्यहस्तः कथंचन ।।५।।
नाचामेत् प्रचरेत्पुनः अचरन्परिवेषणं कुर्यात् । अन्नपानेषु लेहेषु काद्यतिरत्नाकरः

॥शु०॥ ऽभावन्तं प्रतिष्ठाप्य कृत्वा स्नानं यथाविधिः। तत्संयोगात्पयःकान्तमुपस्पृश्य ततः शुचिः॥ अथ स्नान
॥३९॥ शुद्धिः। तत्र मनुः॥ दिवाकीर्तिमुदक्यां च सूतिकां पतितं तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति॥
39 अथाचम्य प्रयतो नित्यं जपेदशुचिदर्शने। सौरान्मन्त्रान्यथोत्साहं पावमानीश्च शक्तितः॥ नारं स्पृष्ट्वा
स्थि सस्नेहं स्नात्वा विप्रो विशुध्यति। दिवाकीर्तिश्चाण्डालः। उदक्या रजस्वला। सूतिका प्रसवे सत्यप्राप्त
स्नानं समया। तत्स्पृष्टिनामिति दिवाकीर्त्यादीनां सर्वेषां न हवेदनपरामर्षी। तेन चाण्डालादिस्पर्शनं चेत्यर्थः॥
एतच्चाकामकृतस्पर्शविषयं॥ कामाकृते तु बृहस्पतिः॥ पतितं सूतिकां चान्त्यं शवस्पृष्टं तु कामतः। स्ना
त्वा सचेलं कृत्वाग्निं घृतं प्राश्य विशुध्यति। सचेलमिति। यद्वस्त्रं चण्डालजं स्पर्शकाले भवति। तेन सहैव स्ना
नव्यमित्यर्थः॥ स्नानं चेदं जलाशयावगाहनासंभवे तु शीतोदकेनापि कर्तव्यं। यदाह संवर्तः॥ नित्यं नैमित्तकं काम्य
कृत्याङ्गमलकर्षणं॥ तीर्थाभावेऽपि कर्तव्यमुष्णोदकपरोदकैः॥ अशुचिदर्शने तु पावमानीः सौरान्मन्त्रानाचम्य ॥वि०॥
प्रयतो जपेत्॥ अशुचिश्चाण्डालादिरेवेति रत्नाकरः॥ पावमान्य ऋग्विशेषाः। बहुत्वं च त्रित्वपर्यवसितं॥ अस्थि ॥३९॥
स्पर्शे चात्र स्नानमाकामकृते कामकृते तु ब्रह्मपुराणे॥ मनुष्यास्थि तु संस्पृश्य स्निग्धं निःस्नेहमेव च। स्नात्वा
कृ० संस्पृश्य सूर्यं स्पृशेद्द्विः समनुस्मरेत्। निःस्नेहास्थिस्पर्शे अकामकृते आचमनमात्रं विष्णुः। रतश्च सर्वदा अस्थि

अस्निग्धे

ऽप्रन्यत्रतु कामकृते। वसिष्ठः॥ मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमशौचमस्नि होरात्रमिति॥ऽत्र च सर्वैक
काबपतनाऽ यमर्थः॥ नरस्पं च नरवास्थिसंस्पर्शे दो बाधानः॥ऽत्र नरस्पर्शं च नरवास्थिहास्थिस्पर्शे॥ऽशाचमनं॥ऽस्नि
स स्निहाआर्द्राणास्थिस्पर्शे॥ऽकामकृते स्नानमात्रं कामकृते। स्निग्धास्थि स्वोआर्द्राणास्थिस्पर्शे कामस्नानं स्पर्
र्यदर्शनं विष्णुस्मरणं वा॥ निस्नेहआर्द्राणास्थिस्पर्शे॥ऽकामकृते॥ऽचमनमात्रं। आर्द्रेतरमानुषास्थिसंबंधि
स्निग्धास्थिस्पर्शे॥ऽकामकृते। त्रिरात्रमशौचं। जोस्पृष्टेत्॥ऽस्निग्धआर्द्रेतरास्थिस्पर्शे कामकृते॥ऽहोरात्रं(मनुः॥ वांते विरिक्तः
स्नात्वा च घृतप्राशनमाचरेत्॥ऽत्राचामे देवमनुकान्तं स्नानं मैथुनिनः स्मृतः॥ वांतकृत वमनः॥ विरिक्तकृतविरेकः मर्घ्
नाधिकृत। विरेकवान्। एवं मतः स्नात्वा घृतं प्राश्य विशुध्यतीत्यर्थः। मिलितं चैनतद्दपन्लिमित्तं मैथुने दुःस्वप्न
वमनविरेचकशंतिविष्णुवचनादितिरत्नाकरः॥ऽत्राचामेदित्यादि॥ऽनंतुकावांते॥ऽत्राचामेदेवन स्नायात्। ते नदिनोत
रेवमनविरेकजोस्नाननिमित्तं त्वमित्यर्थः॥ स्नानं वै मैथुनिनइत्यपि स्मृतं कालि मैथुनविषयं। तथा वशातातपः स्मृतौ तुगर्भ
संकित्वा स्नानं मैथुनिनः स्मृतः॥ऽप्रनत्नौ न सदार्कायं शौचं मत्रपुरीषवत्। मत्रपुरीषवदति। लेपात्यये स्वाचि बतपाविव
वास्थिते। यत्तः॥ऽअजीर्णेभ्युदिते वांते स्मश्रुकर्मणि मैथुने। दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते॥ऽअजीर्णे सति ऽभ्युदिते
सूर्ये दृष्ट्वा नेतरं वांते स्नानं समुदितमेवात्तन्निमित्तं तेन प्रयुक्षितं वांते न स्नानमित्यर्थः। स्मश्रुकर्मणि स्मश्रुक्षौरे मैथुने
ऋतुकाल एव स्नानं। नत्वस्नानं प्रातः कालेव र्जयतिति। दुर्जनस्पर्शः चांडालादिदेयत्नः। स्वपाकंपतितं व्यंगमुन्मत्तं शवक

॥स्मृ०॥ तारकं स्पृशति कांस्यपिकं नारी रजसा च परिस्रुतां। श्वकुक्कुटवाराहास्त्वग्राम्यान्संस्पृश्य मानवः। सचेलं सशिरः स्ना-
॥४०॥ त्वा तदानीमेव शुध्यति। अशुद्धान्स्वयमप्येतानशुद्धश्चापि यदि स्पृशेत्। विशुध्यत्युपवासेन पुनः कृच्छ्रेण वा पुनः।
40 स्नाति अशवकारोपि त्रिकृच्छ्रेण वा पुनरिति। वारंवारं कामकृतस्पर्शविषयं। तथा। अपस्पृश्याशुचिस्पृष्टेनतीजेवा-
पि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति। अत्र चांडालादिस्पर्शेऽज्ञानकृते हस्तपादप्रक्षालनमाचे-
मतेज्ञेयं। कामकृते तु चांडालादिस्पृष्टस्पर्शे स्नानमात्रं। तथा। मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसा
मज्जानं शोणितं वापि परस्य यदि संस्पृशेत्। स्नात्वापमृज्य जलेपादीनाचम्य च शुचिर्भवेत्। तान्येव स्वानि सं-
स्पृश्य पूतः स्यात्परिमार्जनं। लेपादीनामपमृज्य स्नात्वाचेति क्रमः। अत्र च मानुषास्थीनामपि मानस्वसंब-
न्धिनामेव चोदनसंनिहितत्वात्। वसादिस्पर्शे चात्र नाभेरूपरि स्नानहेतुः। ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुप-
हन्यते। तत्र स्नानमधः स्नात्वा क्षालनेनैव शुध्यति। अंगिरोवचनात्। अपः स्पर्शे तु क्षालनं। आचमनप्रभृतय-
त्रपा। बौधायनः। चांडालेन सहाध्वगमने सचेलस्नानं। इदं च कामकृतिविषयं। चांडालाद्युरव्यलया तत्सहगमने ॥वि०॥
विषयमिति रत्नाकरः। पाराशरः॥ चैत्यवृक्षश्चितिर्यूपश्चांडालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलो जलमाव- ॥४०॥
सेत्। बौधायनः। अनोपहतं सचेलो जलमवगाह्य प्रक्षाल्य वा तद्देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्रयतो भवती-
अनोपहतः। अनास्पृष्टः। अत्र नाभेरूर्ध्वस्पर्शे [illegible] लनमाचमनं चेति। अपवस्त्रितो चिकल्प

शाकादिसस्पर्शे देवीराप इत्येताभिः रतोञ्जले स्नातः पूतो भवति श्वपचः मातङ्कः बरीक इति प्रसिद्धः मुष्टिकः

इति रत्नाकरः। हारीतः। श्वपचमुष्टिकपुल्कसतक्षारकः शावरः। देवीराप इत्येतः देवीरापोः। अपान्त्यपदित्याद्याः पक्षि

ग्रहणे च पः। अयं च प्रयोगो वारंवारस्पर्शे। अन्यथा स्नानमात्रं तथा। अजीर्णे वान्ते श्मश्रुकर्मणि योनिप्रभृतिदर्शने मैथुन

गमने च। अयोनिः योनिव्यतिरिक्तमङ्गं। पर्युषितदिवादिनादिने एतेषु मैथुनगमने। अजीर्णे वान्ते श्मश्रुकर्मणि अशौचस्नानं तिर

र्थः॥ पराशरः। श्वकाकैरवलीढस्य नखैर्विदालितस्य च। अद्भिः प्रक्षालनं शौचं अग्निना चोपचूलनं। अवलीढस्पर्शिकास्ट

स्पा। उपचूलनं शिखिसंमिलनं। जो वह्निज्वालया स्पर्शनं। च्यवनः। स्नानं श्वपाकं प्रेतधूमं देवद्रव्योपजीवनं। ग्रामयाजकं सोमविक्रयं

यं सस्नेहमानुषास्थिशवस्पर्शं रजस्वलां महापातकिनः शवं स्पृष्ट्वा सचैलमम्भोवगाह्य उत्तीर्याग्निमुपस्पृशेत्। गायत्रीं शतं काक

जपेत्। घृतं प्राश्य पुनः स्नात्वा त्रिराचामेत्। अग्न्यादिस्पर्शादिकाभावे वारंवारस्पर्शे अन्यथा स्नानमात्रं। आपस्तम्बः। एकशाखास

मारूढश्चण्डालादिर्यदा भवेत्। ब्राह्मणस्तत्र आसीनः स्नानेन शुचितामियात्। कालिकापुराणे। स्पृष्ट्वा रुदस्य निर्माल्यं सवाससा जलं

नः शुचिः। निर्माल्यं प्रत्यानीतं। एवमेव चाराद्दर्शीः। व्यासः। भासमानं वपाजीरखरोष्ट्रांश्च तुनां नपाः। करणं मनोध्यं च स्पृष्ट्वा स्नायात्

सचेलकं॥ भासो जो घः। कुक्कुट इति प्रसिद्धः। उष्ट्रो वा। अन्त्यानां स्पर्शे स्नानं नाभेरधः स्पर्शे हस्तौ पादौ प्रक्षाल्य नमाचमनं

च वाक्यान्तरैकवाक्यतया। याज्ञवल्क्यः। चण्डालपुल्कसम्लेच्छभिल्लपारसिकादिकान्। महापातकिनश्चैव स्पृष्ट्वा स्नायात्सचेलकं।

पुल्कसश्चण्डालादिभेदजातिः म्लेच्छाः प्रसिद्धाः। भिल्लाः सारङ्गदाः। पारसिकाः यवनाः। आदिशब्देन तज्जातिभेदाः विज्ञेयाः।

॥ ५० ॥ मार्कंडेयपुराणे ॥ प्रमोदप्यसूतिकाश्वखरमार्जाराखुश्वकुर्कुटान्। पतितापविद्धचांडालमृतहारांश्च धर्मवित्। संस्पृश्य शुध्यति स्नाना-
॥ ४१ ॥ दुदक्यायाम्यसूकरौ ॥ अत्र मार्जारस्पर्शे यत्स्नानं यद्यपि पुरुषेण मार्जारः स्पृश्यते तदा ज्ञेयं। यदि तु मार्जार एव पुरुषं स्पृशति मां-
५१ डादिवा तदा पुरुषादेरशौचाभावः। तद्विषयमेव मार्जारश्च सदा शुचिरिति वचनमिति व्यवस्था ॥ आचारादर्शः। पैठीनसिः ॥ मनु-
ष्यमूत्रपुरीषकरणे सचेलस्नानं। उदकव्यतिरेकेण मूत्रपुरीषोत्सर्जनं तरं शौचविलंबे शौचं कृत्वा स्नानमित्यर्थः। ब्रह्मपुराणे
उच्छिष्टेनाथ विप्रेण विप्रस्य स्पृष्टस्तु तादृशः। उभौ स्नानं तु प्रकुर्वीतेस यएव विशुध्यति। अप्युहारीतः। स्वचिष्ठोकाकविष्ठा वा-
वटजाध्वनरस्य च ॥ अधोच्छिष्टस्य संस्पर्शे सचेलो जलमाविशेत्। ऊर्द्ध्वोच्छिष्टस्तु संस्पृश्य प्रापवित्रं तं समाचरेत्। उपोष्य
रजनीमेकां पंचगव्येन शुध्यति ॥ अधोच्छिष्टो मूत्राद्युत्सर्जेनाशुद्धः। ऊर्द्ध्वोच्छिष्टो भोजनोच्छिष्टः। जलमाविशेत्। सचेलं
स्नायादित्याचारमाधवः। सर्वत्र चात्र प्रकरणे जलमाविशेदित्यादि। वाक्यानि वरुणस्नानोपलक्षकानीत्याचारादर्शः। शंखः। रथ्या-
कर्दमतोयेन ष्ठीवनाद्येन वा पुनः। नाभेरूर्द्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति ॥ अत्र च प्रकरणे रघुनैनैमित्तिकस्नानेषु मन्त्र-
स्नाना त्रतर्पणप्रसंगो नास्ति। तथाचापस्तंबः ॥ श्वस्पृष्टस्पर्शने वांते अश्रुपाते भगोत्थुरे। स्नानं नैमित्तिकं प्रोक्तं दैवपित्र्यविवर्जितं।
जलाशयप्रदोषात्संभवेऽत्युष्णोदके नापि तान्स्नानं कर्तव्यं। तथाच शंखः। नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं। तीर्थाभावे ॥ वि॰॥
पि कर्तव्यमुष्णोदकपरोदकैः। क्रियांगं देवयज्ञादिक्रियांग। मलकर्षणं। अभ्यंगपूर्वकं स्नानं। यच्चातुरे ज्वरवशादुष्णोदके ॥ ४१ ॥
स्नानशक्तिरपि न भवति। तदा स्मृत्यर्थसारे माहारयमः ॥ आतुरे स्नानसंप्राप्ते दशकृत्वस्त्वनातुरः। स्नात्वा स्नात्वा स्पृशेत्तंपू।

ततः शुद्धो भवेदातुरः ॥ इति स्नानशुद्धिप्रकरणं ॥ अथ तैजसादिद्रव्यशुद्धिः ॥ ब्रह्मपुराणे ॥ सुवर्णरूप्यशंखाश्मशु
क्तिरत्नमयानि च ॥ कांस्यायसताम्ररैत्यानि त्रपुसीसमयानि च ॥ निर्लेपानि च शुद्ध्यंति केवलेनोदकेन तु ॥ शूद्रो
च्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः ॥ सूतिकाशवविण्मूत्ररजस्वलाहतानि च प्रक्षेप्तव्यानि तान्यग्नौ
पचेद्यावत्सहेदपि ॥ रत्नमयानि स्फटिकादिघटितानि । रैत्यानि पित्तलघटितानि । त्रपुमयं रंगघटितं
शूद्रोच्छिष्टानीति । शूद्रोच्छिष्टस्य स्थानीत्ययमर्थो ज्ञेयः ॥ शूद्रेणानुभुक्ते भाजने ऽग्नौ शंखवाक्येन शुद्धि
रिष्यते ॥ सूतिकारजस्वलोपहतभाजनस्य भोजनाधारे च तद्[illegible]कस्य स्फुटीभविष्यति । प्रक्षेप्तव्यानीति प्रक्षाल
नानंतरं यज्ञाजनं यावत्समयपर्यंतं अग्निं सहेत्तावदग्नौ संयोजयेदित्यर्थः ॥ ताम्रायःकांस्यरैत्यानां त्रपुणः
सीसकस्य च ॥ शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ॥ यथार्हं ॥ मलापकर्षणसामर्थ्यानुसारेण । क्षारो भ
स्म ॥ अम्लोदकं जंबीरादिरसः ॥ योग्यतानुसारादाम्लोदके ताम्रेण संबध्यते । इतरेषु क्षारोदकजलेन रूप्यपात्र
समुच्चयः ॥ स्वस्वः ॥ अम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा । क्षारेण शुद्धिः कांसस्य लौहितस्य विनिर्दिशेत् ॥ एतदपि
स्नेहादिलेपयुक्तविषयं ॥ पैठीनसिः ॥ त्रपुसीसकताम्राणामयसां रुक्मणस्तथा । उच्छिष्टस्नेहसंस्पर्शे क्षारोदकाभ्यां भस्मनस्य च

अम्लो

स गोमत्रेन्द्रसमत्रयु अङ्घरिस्यापनं मतान धावा

॥स्मृ०॥ त्वग्रस्पर्शं स्वमुक्तादि॥ बौधायनः॥ तैजसानां तु पात्राणां शुद्धिर्होपहतानां त्रिसप्तकृत्वः परिमार्जनं परिमार्जी
॥४२॥ न द्रव्याणि मज्जोच्छ्रुद्रस्मानि। कत्रपुरीषलोहितरेतःप्रस्नुतोपहतानां पुनः करणं एवमस्समप्यानां चा॥ अलाबुबिल्व
स्मृ वैदलानां गोवालैः परिमार्जनं॥ नलवेणुकुशस्पृतानां गोमयेनाद्भिः प्रक्षालनं त्रिसप्तकृत्वः परिमार्जनं
मेकविंशतिवारमित्यर्थः। वैदलानां तु वेणुदलादिनिर्मितानामित्यर्थः॥ अङ्गिराः॥ गंडूषं पादशौचं च नयः कुर्यात्
कांस्यभाजने॥ भूमौ निक्षिप्य षण्मासान् पुनराकारमाविशेत्॥ इदं द्वितीयपार्श्वत्वाद्धि माजिव्य त्रपेतसमस्य पौ
न्व्यमा॥ अकारमादिशेत्॥ अङ्गिरो देहत॥ शंखः॥ स्नातकोच्छिष्टभांडस्य सुरामद्योपहतस्य। त्रिसप्तमार्जनैः
शुद्धिः नतु कांसस्य भाजने। भांडस्य भाजनस्यो वर्णादेः। सुराजौ डीपौ वीमाध्वीन दयातिरिक्तं पयसादिसंभृ विधा
वं मद्यं। ताभ्यां चोपहतस्य त्रिसप्तमार्जनैरेकविंशतिमार्जनैः शुद्धिः॥ कांसस्य तु नेयं शुद्धिः॥ शंखः॥ अमलक्षत्रविशां
चैवसक्तसंमार्जनाशुचिः॥ चतुर्थेन तु पञ्चत्वं चतुर्भिरेव मार्जनं॥ अङ्गनो निक्षिप्य गरमीयाङ्क्लौ प्रक्षाल्य यन्त्रितः ॥वि॰
गोमूत्रेण तु संस्पर्शत्पात्रं शुचितामयात्॥ ब्राह्मणक्षत्रविशांपरस्मिन् भाजने भोजनं कृतं तत्संकृतसमार्जनं द्ध ॥४२
चीत्यर्थः॥ चतुर्थेश्च वर्गदेण आलनादीनां पञ्चतेन खवत्तु वारमार्जनादिपि शुद्धिमित्यर्थः॥ तदिदं सर्वैकवाक्य
तपात्तेजसद्रव्यशुद्धौ व्यवस्थायां तु वर्णोरूप्यं शंखाश्मरजस्तिरत्नकांस्यपत्रौ हि पिपित्तलरजसीसकपलानि भाजनानि।

किं तु शाकुंडुपघातेः अत्रोपनापन एमिरसारकुंडुपघाते पुनः घटितेन ५

कांस्यपात्रि

केवलेन जलेन शुध्यंति ॥ उच्छिष्टादिलेपयुक्तानि क्षारोदकाम्लोदकान्यतमेनापो यज्यं शुध्यंति । श्वादोच्छिष्टेन चिर
कालोपघाते वारत्रयं क्षारोदकक्षालनानंतरं वह्नौ यावत्सहनं क्षेपात्शुध्यंति । एकस्य काकश्वादोच्छिष्ट
स्पर्शितानि गवाघ्रातानि एकविंशतिवारक्षारोदकमार्जनाच्छुध्यंति । त्रैवर्णिकस्य यस्मिन्भाजने शूद्रेणाभ्य
वमनम् ॥ श्वादोषणं तु तैलतच्चतुर्भिर्दाहैर्मार्जनानंतरमग्नौ प्रतापनाच्छुध्यंति । गंडूषपादशौचं च यस्मिन्कांस्
स्यभाजने कृते घर्षणात्खननिधनानंतरं वह्नौ प्रतापनाच्छुध्यंति ॥ मूत्रपुरीषरेतःप्रभृतिभिः शारीरैर्मलैर्
चिरकालदुष्टपहतानि तैजसपात्राणि सप्रवारमात्रं गोमूत्रे मृदा न धावास्थापनाच्छुध्यंति ॥ अनेकवार
मूत्राद्युपहतानि शवस्पृतिकारजस्वलोपहतानि च वारत्रयं क्षारोदकप्रक्षालनानंतरं यावत्सहनमग्नेः
प्रतापनाच्छुध्यंति । देवलः ॥ लोहानां दहनाच्छुद्धिः भस्मनाजोमयेन वा ॥ दहनात्खननाद्वापि शोलानाम
प्रसापि वा ॥ कांस्यानां तक्षणाच्छुद्धिः मृज्जेमयजलैरपि ॥ मृन्मयानां तु पात्राणां दहनाच्छुद्धिरिष्यते ॥
अत्र दहनादित्वं तोपघाते दहनेन खननेन वाः अल्पघाजलेनाधो वाभाजनानि सपिसलोपोपघातेत
क्षणादत्पत्र जलेन वैति व्यवस्था ॥ मन्मयानामप्रतानुपहतानां पुनः पाकः ॥ अत्यंतोपहतानां मन्मयानां

स्मृ-॥
॥४३॥ च दारवाणां च त्यागः ॥ तथा च विष्णुः ॥ दारवं मृन्मयं त्याज्यं स्यात् ॥ तत्रात्यंतोपहतमिति पूर्वप्रसक्तं ॥ काश्यपः ॥
43 सिकतादिभिर्द्रव्यं गंधाश्वसंशुक्ता नोंसिकतादिभिर्दुर्ल पुरू वालुकादिभिः ॥ अत्यंतोपघातविषयं चै
दं ॥ अन्यथा केवलं जलेन शुद्धिरित्यनुवर्त्तौ ॥ हारीतः ॥ अद्भिः कांचनरजतानां तमुणवर्णयोजात नां
स स्नेहवैवर्ण्योपहतानां ॥ यवगोधूमकलायमाषवाजोमयचूर्णैर्माज्र्जनं ॥ रोचनाद्भिः प्रक्षालनं ॥
अगाम्रलवणाभ्यां ताम्राणां भस्मनाकांस्यानां ॥ शानचर्मणोः शैलानां निर्लेषशोः दकमयानां
पुनः पाकेन मृन्मयानां ॥ गोमूत्रगोमयचित्वैर्वैदलानां गोवालरत्वासोदकपास्त्रफलपा
त्राणां माज्र्जनं ॥ कमंडलूनां पतिपत्राणां च क्षारोदकाभ्यां चकर्पासशणमयानां च पुत्रंजीवातिष्ठकैः
क्षौमदुकूलानां ॥ पुत्रंजीवोदकाभ्यिद्भिः क्षीनानां ॥ श्रीफलश्वेतसर्षपैः कौशेयानां ॥ उदित्यद्वत्ली
कमदाघर्षणैः ॥ ऊर्णानां स्नेहसक्तुकुल्माषोद्वर्तनैर्गुरूणां ॥ आपमर्षः ॥ तमुणासवर्णयो ॥वि॥
गात्तमुणोयोवर्णस्तेनयोजोपहतत्वंतत्र कांचनाद्यानामाद्भिः केवलाभिःशुद्धिः ॥ सुव्यक्तम ॥४३॥

+ऊर्णापट्टाम्बुक द्यौ कूलादिक चर्मणि५

गौरसर्षपै

न्यग्रोधपुत्रंजीवपितरूजिप्या।। अविष्टः परिटड्ढति प्रसिद्धो।। उदस्थितरतर्के।। कुल्माषो वो ढ इति प्रसिद्धः।। इति
रत्नाकरः।। अत्र च पुत्रजीवादिभिश्चूर्णितैः शोधनं योज्यत्वात्।। क्षौमादयः पट्टवस्त्रभेदाः।। गु
रूणामिति ऊर्णामयानामेव महतां कंबलानामित्यर्थः।। एवं चाशुद्धिरेषावस्त्राणां मलवत्वे सति।। अ
न्यथा केवलजलेन शुद्धिः।। तथा च देवलः।। तांतवं मलिनं शुद्धं मद्भिः क्षारैश्च शोधयेत्।। अंशुभिः शो
षयित्वा वा वायुना च मात्रं हरेत्।। ~~[illegible]~~ महत् कूलादिक चर्मणां।। अल्पाशौचे भवेच्छुद्धिः शोष
ण प्रोक्षणादिभिः।। तान्येवामेध्यलिप्तानि निर्णिज्यौंधान्यकल्केः।। पर्णकल्केरसैश्च फलवल्कलैः।। तति
क पुष्पधानानि पुच्छरत्नांबराणि च।। शोषयित्वातपे किंचित्करैरुन्मार्जयेन्मुहुः।। पश्चाच्च वारिणा
प्रोक्ष्य शुचीन्येव प्रदा हरेत्।। तान्यप्यति मलिष्ठानि यथावत्परिशोधयेत्।। शातातपः।। कुसुंभकुंक
मारक्तातथालाक्षारसेन च प्रक्षालनेन शुद्ध्यति।। चांडालस्पर्शनेन तथा।। अंगिरा।। शौचं सह
स्र प्रानां वाप र्द्धं दुरुस्थाना।। रेतस्पृष्टं शवस्पृष्टं माविकं तु न शुष्यति।। शणजानि रोमवल्कानि यानि तु वका

रौ तिले प्राणयानानि

॥ शु॰ ॥ न्येतानि सर्वाणि संहतानि प्रदृश्यन्ते ॥ सहस्ररोमाणां मूर्द्धादिरोमनिर्मितानामित्यर्थः ॥ रोमवद्धानि केवला
॥ ४४ ॥ नि संहतानि प्राजनादीनि च तानि वा वाद्यादिभिः शुध्यन्तीत्यर्थः ॥ उशना ॥ कौशेयानां गौरसर्षपकल्केन मृद्धि
४४ श्चान्येषां ॥ ब्रह्मपुराणे ॥ प्रत्यहं क्षालयेद्वस्त्रं दैवे पित्र्ये च कर्म्मणि ॥ सर्वं विण्मूत्रसंसृष्टं श्लेष्मदूषितं(?) जलमृद्भिः शुध्यती
ति शेषः ॥ विष्णुः ॥ अत्यन्तोपहतस्य च प्रक्षालितं सन्न विरज्यते तच्छिंद्यात् ॥ बृहस्पतिः ॥ वस्त्रवैदलचर्म्मादेः शुचिप्रक्षाल
नं स्मृतं ॥ अतिदुष्टस्य तन्मात्रं त्यजेच्छित्वा तु शुद्धये ॥ कृष्णाजिनानां तां वालैश्च वालानामद्भिरम्भसा । आम्रत्रेण(?) स्थि
८ [illegible]नानां क्षौमाणां गौरसर्षपैः ॥ वालानां चार्मणामपि इत्यर्थः ॥ शंखः ॥ सिद्धार्थकानां कल्केन दन्तशृंगमयस्य च । गोवालैः
फलपात्राणां मस्स्फास्याच्छृंगवोत्र था(?) । फलपात्राणि नालिकेरादिमयानि । शस्यसंखादीनां तेषां चेपं शुद्धि
रत्यौपघाते । अत्यन्तोपघाते तु । लेषणं वायुपुराणे ॥ जपानिर्यीनागजानां(?) वल्कलानां तथैव च ॥ कुसुमकु ॥ वि॰ ॥
शमानां च ऊर्णाकर्पासयोस्तथा ॥ प्रोक्षणात्कथिता शुद्धिरित्याह भगवान् यमः ॥ मनुः ॥ मार्जनं यज्ञपात्राणां ॥ ४४ ॥
पाणिना यज्ञकर्म्मणि । चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु । चरूणां स्रुक्स्रुवानां च शुद्धिरुष्णेन

स्पा ... मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च

वारिणा॥ सूर्प्यसंकराणां च मुशलोलूखलस्य च॥ अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां॥ प्र
क्षालनेन त्वल्पानामद्भिरेव विधीयते॥ चैलवच्चर्म्मणां शुद्धिर्वैदलानां तथैव च। शाकमूलफलानां च
धान्यवच्छुद्धिरिष्यते। प्रोक्षणात्तृणकाष्ठानि पलालं चाविशुध्यति। मार्ज्जनोपांजनैर्वेश्म पुनःपा
केन मृन्मयं। उपांजनं लेपनं। वा पुराणे॥ मणिवज्रप्रवालानां मुक्ताशंखोपलस्य च॥ सिद्धा
र्थकानां कल्केन तिलकल्केन वा पुनः॥ सिद्धार्थकाः सर्षपाः॥ वोधायनः॥ आसनशयनयान
नावः पंथास्तृणानि च। ऊर्णाकुशशय्याशनेवस्त्राआतापत्यकमंडलु॥ शुचीन्यात्मन एव तानि परेषाम
शुचीनि तु॥ हारीतः॥ ...यसादं नां क्रीतानाम वहननलिपने जीर्हियवजोधूमानां घर्षणदलनवेषणैः
समीधानाम्यां कंडनविमर्शनप्रक्षालनैः कालीकृतानां घर्षेण प्रक्षालनपर्यग्निकरणैः शाकमूलफलाना
मूरस्य प्रस्तृएणप्रक्षालनैरिक्षुकांडानां शमीधान्यवत्॥ यज्ञहविषां स्नपनमेव स्नेहानां पुनःपाकः। कृतलवणानां
पुष्पकुशादिभिः स्पर्शानांस्वस्थानात्रिणकालानामादित्यदर्शनाच्छौचं। दंतानां दंतनिर्मितानां क्रीतानां कृमि
पीतानां व्रीहियवादीनां शम्याधान्यानामणुआदीनां। सेतुमुद्गवानां फलीकृतानां तंडुलादीनां। प्रवहनं कंडनं उत्प
वनं स्फोटनं सूर्प्येणानिस्तृषीकरणं। पर्यग्निकरणं। तदुपरि ज्वालिन भूमणानि त्यर्थः॥ शुद्धिरित्यनुवर्त्तते विष्णुः॥

दुषफलस्राव   प्रक्रोति

रा॰शु॰ ०।। गुडादीनां भिक्षुविकाराणां प्रभूतानां वा ध्वजिनप्रदानेन सर्वल्लवणानां च तथा द्रव्यवत्। कृतशौचानां देव
।।४५।। ताचीतां भूयप्रतिष्ठापनेन ।। प्रसिद्धान्तस्य यावन्मात्रं परित्यज्य शेषस्य कंडनक्षालने कुर्यात् दे
45 वतार्चादिवप्रतिमानस्य अस्पर्शपादिस्पर्शयाः प्रकृतिद्रव्यस्य नाशादे यथोक्तं शौचं कृत्वा पुन
प्रतिष्ठापनेन शुद्धिः ।। कृत्वार्हन्त्वमित्यर्थः ।। अतिमतिशानुवगौदिवल्लः ।। सर्वद्रवाणां पक्वानां लवणस्य
ऽ शुष्णस्य च नान्यशोचं परित्यागादर्शनामिति स्थितिः ।। तोयाभावे परस्परे[illegible]भिसंवेशनेपि च।
कुंडिकायाः परित्यागो दहनं चापदि स्मृतं। कुंडकाकमंडलुः ।। तस्याश्च तोयहीनायाऽशुचिस्पर्
शयाऽशुद्धि भूमिष्यतायाश्च परित्यागः ।। कुंडिकानां रात्नाभेदग्ध्याः ज्ञाप्याः। नयाद्रव्याणां नव
शिष्टानां तोयाठिन्यां विशोधनं। प्रोधनार्थे तु सर्वेषां शुनयं ब्राह्मणैः स्मृतं। स्वपाकोपतस्पर्
शाद्रव्यानामयद्द्रव्यमेव च। पक्वं चाभोज्यकल्पं वा तत्सर्वं परिवर्जयेत्। भोज्यकल्पमर्द्धपक्वं उच्छिष्ट
शुचिभिःस्पृष्टद्रव्यशोधनेभसा। द्रव्यं वार्हप्रभूतं तथाशोधयेत्प्रोक्षणादिभिः। उच्छिष्टशुचिः उच्छिष्ट ।।वि॰
स्नेनाशुचिः।। वृद्धशातातपः।। तापनं घृततैलानां प्लावनं गोरसास्य च।। तन्मात्रमुद्धृत्य शुद्धं स्यात्कठिनं तथा पयो ।।४५।।

म

शूया

दग्धेः ॥ आविलीनं तथा सर्पिर्विलीनं स्रपणेन तु ॥ बौधायनः ॥ बहूनां कुसुमकर्पासगुणलवणानां नामा
प्यिबंधाकठिनीभूतानां चाण्डालादिस्पर्शे प्रोक्षणेनैव शुद्धिः ॥ ब्रह्मपुराणे ॥ ~~[illegible]~~ मैथुनादि
भोजनवर्जितं ॥ शंखः ॥ मद्यैर्मूत्रैः पुरीषैश्च श्लेष्मपूयाश्रुशोणितैः ॥ संस्पृष्टं नैव शुद्ध्येत पुनःपा
केन मृन्मयं ॥ एतैरेव तथा स्पृष्टं ताम्रसौवर्णभाजनं ॥ शुष्कस्नातं चेति लिंगिनां च विधमेद्व च सर्वथा
स्यास्यतेपुनः ॥ लिंगिनां माम्रमाणमित्यर्थः ॥ अशुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते । अमध्यामोज्या
पेयानि वर्जितानीह च स्तते । पक्वपतितचांडालौ ग्रामकुक्कुटसूकरौ ॥ श्वा च नित्यं विवर्ज्याः स्युः षंडे
ते धर्मतः समाः ॥ ब्राह्मणो सूतकी सूतीमत्तोन्मत्तरजस्वला ॥ मतं वंध्यर शुद्धश्च वर्ज्या अथ वैस्यकालतः
सूतीप्रसूता । अशुद्धः पुरीषादिना । स्वेदाश्रुविंदवः फेनो निरस्तो नखलोम च । जीर्णचर्मास्थि त्येतदशु र्ते
चमाकुमन्नीषणं ॥ मानुषास्थिशवं विष्ठा रेतोमूत्रार्तवानि च । कुणपं पूयमित्येतत्कश्मलं समुदा
हृतं ॥ दूषिते ओदिते नास्ति शुद्धिस्तत्ताविधानतः ॥ दुष्टे मार्जन संस्कारैः कश्मलैस्सर्वथा न वेतया
दुष्टे संबंधे कश्मलैश्च संबंधे द्रव्ये मार्जनसंस्कारैः शुद्धिरित्यर्थः । संस्काराश्चात्र तत्रोक्ताः ॥ ॥ ॥

मिश्रपत्र

शु० ॥ इति तैजसादिद्रव्यशुद्धिः ॥ अथ पक्वान्नशुद्धिः ॥ ब्रह्मपुराणे ॥ पक्वमन्नं गवाघ्रातं मक्षिकाकेशदूषितं ॥
॥ ४६ ॥ काकाघ्रातं च तत्कृत्वा शोधयेत्तत्र तं बुभिः सह ॥ गवाघ्रातादिकमन्नं काकाघ्रातं कृत्वा रत्नांबुभिः स
ह सहितं शुद्ध्यतीत्यर्थः ॥ भुंजानस्यापि यच्चान्नं मक्षिकाकेशदूषितं । रजः पपीलिकाभ्युक्षणं वस्तु तैः
46 नदग्धेनु चिह्नायैव शोषयेत्तांबुभिः शुचिः ॥ यमः ॥ मृत्तिकाकेशमन्नेषु पतितं यदि दृश्यते । मूषिक
स्य पुरीषं वा दुर्गंधि चावधूनितं ॥ भस्मनास्य शरपूनीयादभ्युक्ष सलिलेन वा । द्रुतं यस्योपरि
छिद्रीकृतं ॥ अवधूनितं मुखवासोपहतं । भस्मनावेनिवाशकदसमुत्क्षेपे । वाक्यांतरे पात्र
तेन भस्म [illegible] जलान्यांश्यस्पर्शं शुद्ध्यतीत्यर्थः ॥ अवस्रुतं केशपतंगकीटैरुदक्यया वा पतितैः स्पृष्ट
हि ं । अन्नात भस्मादिरन्यतोयैः संस्पृश्य मन्नं मनुराह भोज्यं । यस्योपरि छिद्रीकृतं । उदक्या रजस्व
न ला ॥ [illegible] स्मेतिस्मृद्धस्य तभस्मोपलक्षणार्थं ॥ तथा । मक्षिकादंशमशिकाद्यूरणाः सदन्याः प
पीलिका ॥ आमिषासेव्यासेवी चनैतेकीटा [illegible] विनये । आमिषामेध्यसेवीत्यस्मिन्शोध्यः कीट ॥ वि० ॥
ः एते कीटा विपन्नयेऽन्नादौ पापं न भवतीत्यर्थः ॥ शुद्धिस्तु भस्मादिनैवेति भावः । शातातपः ॥ ४६ ॥

केशकीटगवाघ्रातं वायसोपहतं च यत् स्त्रीवाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः दृष्टं वा स्पृष्टं यदन्नं तु तस्य निष्कृतिरुच्यते अभ्युक्ष्य किंचिदुद्धृत्य भुंजीता
प्यवशंकितः भस्मना वापि संस्पृश्य संस्पृश्योदकेन वा सुवर्णरजताभ्यां च भोज्यं घ्रातमजेन वा तथा श्वसूकरखरोष्ट्रैर्वा पदा लीढं च जंबुकैः अग्नेर्विहा
पतत्पक्ष्यात्संस्पृष्टं व्यजनयाग्निना छागघ्रातं ततः शुद्धं स्याद्धेमजलसंयुतं तथा घृतं तु पायसं क्षीरं तथैवेक्षुरसो गुडः शूद्रभांडगतं तक्रं तथा मधुनः शु
द्ध्यति पायसं पयोविकारो दध्यादीनि रत्नाकरः कल्पतरुप्रभृतयोप्येवं एव च कंदुपक्वं स्नेहपक्वं पायसं दधि सक्तवः एतान्यशूद्रान्नभुजो भोज्या
नि मनुरब्रवीत् कंदुपक्वानि तैलेन पायसं दधि शक्तवः द्विजैरेतानि [illegible] भोज्यानि शूद्रगेहगतान्यपि इति हारीत कूर्मपुराणयोरपि पायसप
का दं दधीतरामिश्राद्दिपयोविरिम [illegible] रं बौधायनः त्वक्केशलोमनखास्थिपुरीषाणि दृष्ट्वा तद्देशपिंडमुद्धृत्याद्भिरभ्युक्ष्य भस्मनावकीर्य पुन
रपि प्रोक्ष्य वाचा प्रशस्तमुदीर्य उपभुंजीत सिद्धहविषां महता वायसप्रभृत्युपहतानां तद्देशपिंडमुद्धृत्य पवमानः सुवर्चेत्युदृच्यं वाक्ये
नाभ्युक्षणं मधूदके पयोविकारे च पात्रात्पात्रांतरनयने एवं तैलसर्पीष्युच्छिष्टसंबंधात्स्वतूदके चोपधानोपयोजयेत् उष्मना-
अजाघ्रातो नात्याद्यानां स्नेहघृतलवणमधुगुडादीनां पुनः पाकेन अन्नाद्यानामदनीयानामितरेषां मनुः देवद्रोण्यां विवाहे च यज्ञे
षु प्रहृतेषु च काकैः श्वभिस्तु यत्स्पृष्टं तदन्नं नैव दुष्यति तस्माच्च मन्नमुद्धृत्य शेषं संस्कार्यमर्हति घनानां प्रोक्षणात् शुद्धिः द्रवाणां

मग्निनातापनात् संस्पर्शनाभवेच्छुद्धिः स्पार्शनेन घृतस्य घ्राणेन गन्धमंस्पर्षं शुचित्वेन विनिर्दिशेत् देवशेताग्रहणे मन्त्रवत्त्वप्रदर्शना
र्थं प्रकृते घृतः सर्वेस्थितपर्थः यमः शुक्तानि छिद्रितोन्नानि न भुंजीत कदाचन प्रक्षालयित्वानि दोषाणां पङ्क्तौ यदा भवेत् शुक्तानिप
५७ र्युषितान्यन्नतानि गतानि तथैवाचारात् यदात्वापद्धर्मोऽस्मान्नर्न्नसंभवस्तदा तानि प्रक्षाल्य निर्दोषाणि संपन्नानि भुंजीत माध्याह्नेरागान्व
यः मसूर माषसंयुक्तं तथा पर्युषितं च यत् तत्तु प्रक्षालितं कृत्वा भुंजीताज्याभिधारितं माषोऽत्र राजमाषः मसूरो [illegible] पात्रा
भक्षण एव साहचर्यात् देवलः भक्ष्यधान्यादिराशीनामेकदेशस्य दूषणे तावन्मात्रं समुद्धृत्य शेषं प्रक्षालयेत्तथा पं भाक्तराशिद्रो
णाधिक विभः द्रोणादभ्याधिकं सिद्धमन्नं न दुष्यति तस्योपहृतमपास्य गायत्र्याभिमंत्रितं सुवर्णाभः क्षिपेद्वस्तस्य दर्शयेद
ग्नेः द्रोणः षोडशप्रस्थः वस्तश्छागः बृहस्पतिः तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे नगरग्रामदाहे च स्पृष्टास्पृष्टं
न दुष्यति आपद्यपि च कष्टायां महाभये पीडने तथा मातापित्रोर्गुरोश्चैव निर्दिष्टो वर्त्तना तथा यमः आममांसं घृतं
क्षौद्रं स्नेहाश्च फलसंभवाः म्लेच्छभांडगता दुष्या निष्क्रांताः शुचयः स्मृताः शातातपः ४।

गोकुले कंदुशालायां तैलयंत्रेक्षुयंत्रयोः अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च अमीमांस्यानि शौचानि शौचाशौचभागिनया न विचारणीयानीत्य
र्थः बालः पंचवर्षाभ्यंतरवयस्कः अथ भूमिशुद्धिः तत्र देवलः पंचधा वा चतुर्धा वा भूरमेध्या विशुध्यति दुष्टा त्रिधा [illegible]द्विधापि शुध्यते मलिनै का
कधा दहनं खननं भूमेरुपलेपनवापने पर्जन्यवर्षणं चेति शौचं पंचविधं स्मृतं अस्यार्थः भूमिस्तावत्त्रिधा [illegible] पवित्रा भवति अमेध्या दुष्टा मलिना
चेति तत्रामेध्यायाः दहनादिभिः पंचभिश्चतुर्भिर्वा शुद्धिः दुष्टायाः दहनादिभिस्त्रिभिः खननोपलेपाभ्यां मलिनायाः एकधा वा उपलेपनेन शुद्धिः वा
पनं मृदंतरेण पूरणं तत्रामेध्यमाह प्रसूते गर्भिणी यत्र यत्र न क्रोहि मानुषः चांडालैरुषितं यत्र यत्र विन्यस्यते शवः विण्मूत्रोपहतं य
च्च कुणपोपस्कृतं भूस्पते एवं क[illegible]सत्वभूयिष्ठा भूरमेध्योनिलक्ष्यते दुष्टामाह क्रिमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी द्रप्सापघर्षतोः छिन्नैर्वा
न्तैर्वा दुष्टतां व्रजेत् श्लेष्मघनीभूतं श्लेष्मादिमलं मलिनमाह नखदंततनूजत्वक्तुषपांशुरजोमलैः भस्मपंकतृणैर्वापि प्रच्छन्ना मलि
ना भवेत् तनूजं लोम अत्र चोपघातेऽल्पत्वभूयस्त्वाभ्यां पंचधा चतुर्धा चेत्यादि विकल्पो व्यवस्थापितः याज्ञवल्क्यः भूशुद्धिर्मार्जनाद्दा
त्कालाद्गोक्रमणात्तथा सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् अवकर[illegible] निरसनं मार्जनं कालो याव[illegible]ता कालेनापवित्ररेणुले
पत्वयोभवजितावान् सेको जलेन प्रक्षालनं उल्लेखनं तक्षणं [illegible] गृहस्य पक्षगुपादानान्न मार्जनलेपनयोः प्रतिदिनं प्राप्त्यर्थं मनुः संमा
र्जनेनांजनेन सेकेनोल्लेखनेन च गवां च परिवासेन भूमिः शुध्यति पंचभिः अंजनं गोमयोपलेपनं अत्र निर्लेपसत्वे पाक्षिकालेपा

पित्र्यायप्यायोग्यं प्रत्येकं समुदायाभ्यां व्यवस्था यमः खेननात्पूरणाद्दाहाल्लेपनादभिवर्षणात् गोभिराक्रमणात्कालाद्भूमिः शुध्यति सप्तभिः बौधायनः घनाया
भूमेरुपलेपनं शुषिरायाः कर्षणं क्लिन्नायाश्च मेध्यमाहृत्य प्रच्छादनं घना निविडा अविषमेति यावत् सुषिरा सच्छिद्रा विषमेति यावत् क्लिन्ना आर्द्रा
अमेध्यमाहृत्याकृष्य प्रच्छादनं मृदन्तरेण पूरणम् संवर्त्तः गृहशुद्धिं प्रवक्ष्यामि अन्तस्थशवदूषिते प्रोत्सृज्य मृन्मयं भाण्डं सिद्धमन्नं तथैव च गृहा
दपास्य तत्सर्वं गोमयेनोपलेपयेत् गोमयेनोपलिप्याथ छागेन घ्रापयेद्बुधः ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिणा सर्वमभ्युक्षयेद्वेश्म ततः
शुध्यत्यसंशयं यमः ब्राह्मणावसथे भूमिर्देवागारे तथैव च मेध्यां चैव सदा मन्ये गवां गोष्ठे तथैव च एतेषु या भूमिस्तां मेध्यां मन्ये द्विजर्षभः अ
नुपहतविषयं चैतत् ब्रह्मपुराणे देवानां प्रतिमाश्चापि वेश्मान्यायतनानि च बाह्यमाभ्यन्तरं शल्यं भूमेरुद्धृत्य शास्त्रतः ततस्तोयेन गोभि
श्च दाहोल्लेखनमार्जनैः शोधनीयाश्च मन्त्रैश्च सरत्नैः पंचभिश्च भूः उद्धृत्य मृत्तिकाः स्नाप्य पवित्रेण जलेन वा ग्रामाद्दण्डशतेऽप्येकं नगराच्च चतु
र्गुणं भूमिः सर्वत्रामेध्या स्यात्तत्र लेपो न दृश्यते मरीचिः गृहेष्वाजातिसंवेशे शुचिः स्यादुपलेपनात् संवासो यदि जायेत तदा तापैर्वि
निर्दिशेत् अजातिश्चाण्डालः संवेशः प्रवेशः संवासोऽवस्थितिः याज्ञवल्क्यः रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः मारुतार्के
ण शुध्यन्ति पक्वेष्टकचितानि च अन्त्यश्चाण्डालः तथा पंथानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः निर्लेपविषयमेतत् बौधायनः अने

कोद्वाह्येदारुशिले भूमिसमे इष्टकाभ्यः संकीर्णीभूताः परस्परसंबद्धा इत्यर्थः पामशार: रथ्याकर्दमतोयानि नावः पंथानस्तृणानि च स्पर्शनान्न प्र
दुष्यंति पक्वेष्टकचितानि च अथोदकशुद्धिः मनुः आपः शुद्धा भूमिगता वितृष्णा यत्र गोर्भवेत् अव्याप्ताश्चेदमेध्येन गंधवर्णरसान्विताः वि
ष्णुः भूमिस्थमुदकं शुद्धं वितृष्णा यत्र गोर्भवेत् अव्याप्तं चेदमेध्येन तद्वद्देवशिलागतं देवलः उद्धृता वा प्रसस्पेते शुद्धैः पात्रैर्यथावि
धिः एकरात्रोषितास्तास्तु त्यजेदापः समुद्धृताः एकरात्रोषिता इत्यत्र पर्युषितत्वमात्रमतात्पर्यं तथा अस्पृश्यानामपां नास्ति प्रक्षालितानां च दूषि
तां स्तोकानामुद्धृतानां च कश्मलैर्दूषणं भवेत् प्रक्षालितानां पर्वतानां पर्वतनिर्झराणां तथा तत्राद्योऽपि तडागानि नदी वाप्यः सरांसि च कश्मलाशु
चियुक्तानि आसमंतात्तीरदेशे वर्जयेदित्यर्थः शङ्खलिखितौ आपो रूपरसगंधवत्यः परिच्छिन्नाः न चर्मकरंडकैरभ्युद्धृताः चर्मकरंडश्चर्म
पुटकः यमः प्रपामरण्ये घटकं च कूपे द्रोण्यां जलं कोशगतास्तथापः ऋतेऽपि शूद्रात्तदपेयमाहुः आपद्गतो भूमिगताः पिबेत्तु प्रपा प्रस्थितं जलं घटकं पा
घटकस्थितं जलं घटकोऽत्र कूपादौ सर्वसाधारणजलोद्धरणपात्रं कलशादितज्जलं द्रोणी काष्ठांबुवाहिनी इत्यमरः कूपादावेव गवादिजलपानार्थं कोशश्च
र्मपुटः ऋतेऽपि शूद्राच्छूद्रेतरस्वामिकं द्विजस्वामिकमपि प्रपादिस्थितजलमित्यर्थः हारीतः रात्रावेतावत्करणं प्राविशति तस्मान्न रात्रौ गृह्णीयात् धाम्नो त
धाम्न इत्यग्निमुपविष्टाधारं यं गृह्णीयात् बृहस्पतिः उच्छिष्टं मलिनं क्लिन्नं पद्म विष्ठानुलेपितं अद्भिः प्रक्षालितं तत्सर्वमपां शुद्धिः कथं भवेत् सूर्येंदु
तीर्थतः परिवर्जयेत् कश्मलं शवादि अशुचि विण्मूत्रादि तीर्थतः इति समंतात्तीरनेन कश्मलाशुचियुक्तानि [illegible]

रश्मिपातेन मारुतस्पर्शनेन वा गवां मूत्रपुरीषेण शुद्ध्यंत्यापद्भूतिस्थिति उशनाः नद्यः कूपतडागानि सरांसि सरितस्तथा असंहृतान्यदोषाणि मनुः स्वा
५९ यंभुवो ब्रवीत् सरितः शरणशीला निर्झररूपाः असंवृतानि अस्पृश्यस्पृष्टान्यपीत्यर्थः इति कल्पतरुः विष्णुः मृतपंचनखात्कूपादत्यन्तोपहतात्तथा
आपः समुद्धरेत्सर्वाः शेषं वस्त्रेण शोधयेत् वह्निः प्रज्वालितं कृत्वा कूपे पक्वेष्टकाचिते पंचगव्यं न्यसेत्पश्चान्नवतोयसमुद्धरेत् जलाशयेषु चा
न्येषु स्थावरेषु वसुंधरे कूपवत्कथिता शुद्धिर्महत्सु च न दूषणं अत्रात्यन्तोपहतत्वं पुरीषादिनाऽतिव्याप्तत्वं न तु पारिभाषिकमत्यन्तोपहतत्वं
तत्र शरीरमलमात्रस्य ग्रहणोत्क्षपातादावपीयं शुद्धिः स्यात्तथा चातिप्रसंगः आपस्तंबेन कू[illegible]मूत्राद्युपघाते शुद्धं तत्कथनाच्च तथा चापस्तं
बः उपानच्छ्लेष्मविण्मूत्रस्त्रीरजोमद्यमेव च एभिश्च दूषिते कूपे कुंभानां षष्टिमुद्धरेत् कुंभानां जलपूर्णानामित्यर्थः बृहस्पतिः श्वभिः श्वपाकचांडा शु ५
लैर्दूषितेषु विशोधनं उद्धरेदुदकं सर्वं मार्जनं परिशोधनं श्वपाकश्चांडालभेदः तथा वापीकूपतडागेषु दूषितेषु विशोधनं घटानां शतमुद्धृ
त्य पंचगव्यं ततः क्षिपेत् वापी सोपानयुक्तकूपः एवं च यत्र घटशतोद्धरणेनैव सर्वोद्धारो भवति तत्रैव सर्वोद्धारः अधिकजले घटशतोद्धर
णं कृत्वा पंचगव्यक्षेपः अतिमहत्सु तडागादिषु दोषाभाव एवेति व्यवस्था यमः अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका दशरात्रेण शुद्ध्यं

तिभूमिस्थं चनवोदकं ब्रह्मपुराणे नवषानजलं गावो महिष्यस्त्वाग पो नयः शुध्यंति दिवसैरेव दशभिर्नात्र संशयः मनुः वापीकूपतडागेषु त्रापो
ग्राह्यास्ताः सर्वतः पश्चात्यप्येद मेध्यं तु पंचगव्येन शुध्यति इत्युदकशुद्धिः अथ रजस्वलाशुद्धिः तत्र मनुः शुद्धा भर्तुश्चतुर्थेह्नि स्नानेन स्त्री
रजस्वला दैवे कर्मणि पित्र्ये च पंचमे शुद्धिमाप्नुयात् तथा प्रथमेह्नि चांडाली द्वितीये ब्रह्मघातिनी तृतीये रजकी प्रोक्ता चतुर्थेह्नि शुध्यति
अत्र चांडालीत्यादि निर्देशः तज्जातीयवदस्पृश्यत्वबोधनार्थं वशिष्ठः रजस्वला त्रिरात्रमशुचिर्भवति सा च नाञ्जीत नाभ्यंजीत नाप्सु स्ना
यादधः शयीत न दिवा स्वप्यान्न मांसमश्नीयान्न ग्रहान्निरीक्षेत नाग्निं स्पृशेन्न रज्जुं सृजेन्न दंतान् धावयेत् न हसेन्न किंचिदाचरेन्न खर्वेणा पि
बेन्नांजलिना पिबेन्न पात्रेण लोहितायसेन चेति विज्ञायते हि खर्वा वामहस्तः लोहितायसस्ताम्रमिति वररत्नाकरः पैठीनसिः त्रिरात्रं मलवद्वासो
धारयमाणा न स्नायान्नाभ्यंज्यान्न नखान्निकृंतेन्नोपमार्जयेत् न रज्जुं सृजेत् न दन्तान् धावयेन्न स्रजं धारयेन्न गंधानासेवयेत् हारीतः भूमौ
काष्ठीयसे पाण्योर्मृण्मये वाश्नीयात् अत्र मिताक्षराकारः दैवे कर्मणि पित्र्ये च पंचमे शुद्धिमाप्नुयादित्यत्र पंचमदिने रजोनिवृत्तिकालो
पलक्षणं पंचमदिनात्पूर्वं रजोनिवृत्तावपि न शुद्धिर्दैवे पित्र्ये च कर्मणि यदा तु रजोदर्शनदिनादारभ्य पुनः सप्तदशादिनाभ्यंतरे रजःसंभव
स्तदाऽशुचित्वं नास्त्येव अष्टादशादिने रजःसंभवे त्वेकाहाच्छुद्धिः एकोनविंशे द्व्यहात् ततउत्तरे त्र्यहाच्छुद्धिः तथा चात्रिः रजस्वला यदि

स्नाता पुनरेव रजस्वला अष्टादशादिनादर्वागशुचित्वं न विद्यते एकोनविंशतेरर्वागेकाहं स्यात ततो द्व्यहं विंशात्प्रभृत्तु नरेषु त्रिरात्रमशुचिर्भवे
५० त् यत्तु चतुर्दशादिनादर्वागशुचित्वं न विद्यत इति स्मृत्यंतरं तत्र स्नानप्राप्तौ तत्वमभिप्रेतं मतो न विरोधः अयं चाशुचित्वनिषेधो यस्या
विंशादिनोत्तरकालमेव प्रायसो रजोदर्शनं तद्विषयं यस्याः प्रौढयौवनायाः प्रागेवाष्टादशादिनात्प्राचुर्येण रजोनिर्गमनस्तस्यास्त्रिरात्रमेवा
शौचं पारस्करः स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरेण तोयेन स्नानं कृत्वा व्रतं चरेत् व्रतं रजस्वलानियमं चरेत् सिक्त
गात्रा भवेदद्भिः सांगोपांगा कथं चन न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत् उशनाः ज्वराभिभूताया नारी रजसा च परिप्लुता
कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा चतुर्थेहनि संप्राप्ते स्पृशेदन्यां तु सा स्त्रियं सा सचेलावगाह्यापः स्नात्वा स्नात्वा पुनः
स्पृशेत् दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः अंत्ये च वाससां त्यागस्ततः शुद्धा भवेत्तु सा दद्याच्छक्त्या ततो दानं पुण्याहेन शुद्ध्य
ति एतत्सर्वं मिताक्षरायामाहुः अथ रजस्वलायाश्चांडालादिशुद्धिः स्पर्शे तत्र बृहस्पतिः पतितांत्यश्वपाकेन संस्पृष्टा स्त्री रज
स्वला प्रथमेन्हि त्रिरात्रं तु द्वितीये द्व्यहमेव च अहोरात्रं तृतीयेन्हि चतुर्थे नक्तमेव च अंत्यश्चांडालः श्वपाकस्तद्विशेषः शाक इ टंकहि
ति प्रसिद्धः स्मृतिरत्नाकरः त्रिरात्रमुपवासं कुर्यादिति वाक्यशेषः मनुः रजस्वला तु संस्पृष्टा शुना जंबुकवायसैः निराहारा भवे ५०

तावद्यावत्कालेन शुध्यति अत्र च सर्वत्रोपवासांते पंचगव्यपानमपि कर्तव्यं भवेदेव: एवं नटचर्मकाररजकादिस्पर्शेष्वुपवास: पंचगव्यं च त्र्यहं नी
यमिति स एव उपवासासामर्थ्ये ऽङ्गिरा: चांडाल: श्वपचो वापि यद्यात्रेयीं स्त्रियं स्पृशेत् अफालकृष्टैर्वर्तेत पंचगव्येन शुध्यति श्वपच:
क इति शेष: आत्रेयी रजस्वलेत्यर्थ: अफालकृष्टैर्हलकृष्टभूम्युत्पन्नै: फलमूलादिभि: अथान्योन्यं रजस्वलास्पर्शे शुद्धि: तत्र काश्यप: रज ९८
स्वलानुसंस्पृष्टा ब्राह्मण्या ब्राह्मणी तु आ एकरात्रं निराहारा पंचगव्येन शुध्यति रजस्वलानुसंस्पृष्टा राजन्या ब्राह्मणी तु या त्रिरात्रेण विशुद्धिः स्याद्व्या
घ्रस्य वचनात्तथा राजन्या राजन्ययेत्यर्थ: रजस्वलानुसंस्पृष्टा वैश्यया ब्राह्मणी तु या पंचरात्रं निराहारा पंचगव्येन शुध्यति रजस्वलानुसंस्पृष्टा
शूद्रया ब्राह्मणी तु या (पं [illegible] पंचगव्येन [illegible])षड्रात्रे विशुद्धिः स्याद्ब्राह्मण्या: कामचारत: अज्ञानतश्चरेदर्द्धं ब्राह्मणी सर्वस्प
र्शने अत्र यथा रजस्वलाया ब्राह्मण्या रजस्वलाब्राह्मणीस्पर्शे उपवास: पंचगव्यं च तथा क्षत्रियावैश्याशूद्राणां रजस्वलानां स्वस्वजातीय
रजस्वलास्पर्शने उपवास: पंचगव्यं च यथा ब्राह्मण्या: क्षत्रियास्पर्शे त्रिरात्रमेव क्षत्रियाया: वैश्यास्पर्शे वैश्यायाश्च शूद्रास्पर्शे त्रिरात्रमेव त
दुक्तं रजस्वला यदा नारी अन्योन्यमुपसंस्पृशेत् सवर्णे पंचगव्येन त्रिरात्रमसवर्णिके पंचगव्येनोपवाससहितेनेत्यर्थ: हीनवर्णायास्तू
त्तमवर्णा रजस्वलास्पर्शे स्नानमात्रं तथा च बृहस्पति: अधिकवर्णा रजस्वलां स्पृष्ट्वा स्नात्वा अश्नीयादिति एवं च क्षत्रियाया रजलाया:
शूद्रास्पर्शे पंचरात्रमित्यूहनीयं सर्वत्र चोपवासासामर्थ्ये फालकृष्टनीवारादिनावर्त्तनं यत्तु मार्कंडेयपुराणे चोक्तं उदक्यानुसव

र्णा स्त्री स्पृष्टा चेत्स्यात् दुरुक्तया तस्मिन्नेवाहनि स्नानाच्छुद्धिमाप्नोत्यपरांसपं ततः स्नानात्पूर्वं चतुर्थीदिनात्स्पर्शविषयं यदि उच्छिष्टया रजस्वलया उच्छि-
51 ष्ट [illegible] स्नानात्पूर्वं चतुर्थीदिनस्पर्शविषयं [illegible] रजस्वलयास्य स्पृश्यते तदाङ्गिराः उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री
रजस्वला पूर्वोक्तं कृच्छ्रं प्रकुर्वीत शूद्रा दानोपवासतः अत्र पूर्वार्धं त्रैवर्णिकस्त्रीविषयं तेनायमर्थः ब्राह्मण्यादीनामुच्छिष्टानां रजस्वलानामुच्छिष्टस-
जातीयरजस्वलास्पर्शे कृच्छ्रं प्राजापत्यं शूद्रा तु रजस्वला उच्छिष्टा तथाविध शूद्रायास्पृष्टा उपवासं कृत्वा ब्राह्मणाय किंचिद्दत्वा शुद्ध्यति एवं च ब्रा-
ह्मण्या स्तथाविधायास्तथाविध क्षत्रियास्पर्शे प्राजापत्यद्वयं वैश्यास्पर्शे प्राजापत्यत्रयं शूद्रास्पर्शे प्राजापत्यचतुष्टयं एवं क्षत्रियायाः वैश्या-
स्पर्शे प्राजापत्यद्वयं शूद्रास्पर्शे क्षत्रियायाः प्राजापत्यत्रयं वैश्यायाः शूद्रास्पर्शे प्राजापत्यद्वयमित्यूहनीयं सर्वं चैतत्कामतः स्पर्शे ऽकामतस्तदर्द्धं
यदि उच्छिष्टया रजस्वलया रजकादिना स्पृश्यते तदा त्रिरात्रं यदि पुनस्तेन श्वादिभिः स्पृश्यते तदा प्राजापत्यं तथा शृगालकुक्कुटादिना स्पृश्यते ऽपि यद्युच्छि-
ष्टा रजस्वला स्पृश्यते तदा प्राजापत्यमित्यूहनीयं कृच्छ्रप्राजापत्यं च दिनत्रयं दिवा एकवारभोजनं दिनत्रयं रात्रावेकवारभोजनं दिनत्रयमयाचितान्न-
भोजनं दिनत्रयं चोपवासः एवं द्वादशदिनासाध्यं व्रतमेतत् तथा च मनुः त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं त्र्यहं परं च नाश्नीयात्प्राजापत्यवि-
धिः स्मृतः एका धेनुश्च वा देयेति भवेद्देवः इति रजस्वलाशुद्धिः अथोच्छिष्टस्पर्शशुद्धिः बौधायनः चाण्डालैः पतितैस्पृष्टो विण्मूत्रेणतु [illegible] द्विजः
त्रिरात्रं तु व्रतं कुर्याद्भुक्तोच्छिष्टः षडाचरेत् इदं कामकृतस्पर्शविषयं तत्र षडुपवासेन एका धेनुः त्रिरात्रं व्रतं त्रिरात्रोपवासमित्यर्थः हारीतः ५१

अनुच्छिष्टेन तु संस्पृष्टे स्नानं येन विधीयते उच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत् प्राजापत्यं च द्वादशाहसाध्यं पूर्वं प्रकरणे विप्रोक्तं कथितं ए तच्च कामतो
भुक्तोच्छिष्टाभ्यासविषयं अङ्गिराः भुक्तोच्छिष्टस्त्वनाचान्तः चाण्डालैः श्वपचेन वा प्रमादात्स्पर्शनं गच्छेत्तस्य कुर्याद्विशोधनं गायत्र्यष्टसहस्रं तु द्रुप
दां वा शतं जपेत् त्रिरात्रोपोषितो भूत्वा पंचगव्येन शुद्ध्यति श्वपचः शाक इति प्रसिद्धः इदं कामतो भुक्तोच्छिष्टविषयं आपस्तंबः चाण्डालेन तु संस्पृष्टो विप्रो
वस्तु द्विजोत्तमः उपोष्य रजनीमेकां पंचगव्येन शुद्ध्यति इदमकामतो ऽध उच्छिष्टविषयम् सर्वं चेदं जलास्पर्शे कुक्कुटादिनिषिद्धं नाभेरूर्ध्वं स्पर्शे समानं
विज्ञेयं नाभेरधः कुक्कुटादिस्पर्शे उच्छिष्टस्य स्नानमात्रं तथा च कुक्कुटादीनुपक्रम्याङ्गिराः ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते तत्र स्नानमधस्तात्तु क्षा
लनेनैव शुद्ध्यति अत्रानुच्छिष्टस्य नाभ्यधः कुक्कुटादिस्पर्शे आचमनविधानादुच्छिष्टस्य स्पर्शे स्नानमेवायाति उच्छिष्टस्य मदिरादिस्पर्शे मनुः आ
न्वधः स्नानमात्रं स्यादा नाभेरेकरात्रकं नाभेरूर्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने विधिः हारीतः उच्छिष्टं तु स्पृष्टो द्विः श्वचाण्डालान्नेकपंचन ऊर्ध्वोच्छिष्टः संस
स्पृष्टो द्विजः सांतपनं चरेत् अधोच्छिष्टो यदा तु स्यात्प्रायश्चित्तं भवेदिदं त्रिरात्रमुपवासः स्यात्पंचगव्येन शुद्ध्यति सांतपनं तु प्रथमदिने पंचग
व्यमात्रपानं द्वितीयदिने उपवासः तथा च याज्ञवल्क्यः कुशोदकं तु गोक्षीरं दधि मूत्रं सकृद्घृतं प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरेत् अङ्गि रे
राः चाण्डालोदकसंस्पर्शे स्नानमेव समाचरेत् उच्छिष्टेन तु संस्पृष्टस्त्रिरात्रेण विशुद्ध्यति चाण्डालादिस्पर्शे कृतस्नानस्य भोजनादावापस्तंबः
संसर्गं तु यदा गच्छेच्छ्वोदक्यान्त्यजैः सह एतैरेव यदा स्पृष्टो प्रायश्चित्तं कथं भवेत् भोजने तु त्रिरात्रं स्यात्पाने तु त्र्यहमेव हि मैथुने पादकृच्छ्रं स्याद्य त
थाम्‍त्र पुरीषयोः दिनमेकं तथा मूत्रे पुरीषे तु दिनद्वयं एकाहस्तत्र निर्दिष्टो दन्तधावनभक्षणे पादकृच्छ्रस्तु चतुर्दिनसाध्यः तत्र प्रथमदिने ए

श्री

कभुक्तं ततो नक्तभोजनं ततोऽयाचितभोजनं ततउपवासः तथाच याज्ञवल्क्यः एकभक्तेन नक्तेन तथैवयाचितेनच उपवासेनचैकेन पादकृच्छ्रः प्र
कीर्तितः अन्त्यंताभ्यासे विप्रो यमाहापस्तंबः चांडालं चैव संस्पृश्य पतितां यांतु कामतः द्विजश्चांद्रायणं कुर्यात्प्राजापत्यमथापि वा प्राजापत्यं रजस्व
५८ लाशुद्धिप्रकरणे कथितं चांद्रायणमाह वसिष्ठः एकैकं वर्द्धयेत्पिंडं शुक्ले कृष्णे च ह्रासयेत् अमावास्यां न भुंजीत एष चांद्रायणः स्मृतः पिंडा
श्च मयूरांडप्रमाणाः अमावास्यामामावास्यायामित्यर्थः तैलाद्यभ्यक्तस्य चांडालादिस्पर्शे आपस्तंबः केनकेन च दभ्यक्तश्चांडालं पतितं स्पृशेत्
उपवासेनचैकेन पंचगव्येन शुद्ध्यति तथा चर्मकारं तु रजकं धीवरं नटमेव च एतान्स्पृष्ट्वा नरो मोहादाचामेत्प्रयतोपि सन् एतैः स्पृष्टो यदोच्छि
ष्ट एकरात्रं पयः पिबेत् नैकाच्छिष्टेस्त्रिरात्रं स्यादाज्ञातं प्राश्य विशुद्ध्यति पयोऽत्र जलं सर्वत्र चात्रो भयोरप्युच्छिष्टयोः स्पर्शे द्विगुणं दृष्टव्यं वृहस्पतिः
उच्छिष्टोच्छिष्टसंस्पर्शः कदाचिदुपजायते वर्णानां तु सजातीनामुपस्पृ स्यततः शुचिः उच्छिष्टस्योच्छिष्टसंस्पर्श इत्यर्थः उपस्पृश्याचम्येत्यर्थः
इदं चाकामतः स्पर्शविषयं कदाचिदितिवचनात् कामतः स्पर्शे आपस्तंबः विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कथंचन स्नायानेन विशुद्धिः स्यादा
पस्तंबोब्रवीदिदं क्षत्रियेणाथ दास्पृष्ट उच्छिष्टस्तु कथंचन स्नानं जप्यस्त्रैकाल्यं दिनस्यांते घृतं पिबेत् एवमेव वैश्यस्पर्शे सर्वत्र चद्वयोरप्यु
च्छिष्टत्वं ज्ञेयं उच्छिष्टोच्छिष्टसंस्पृष्टः शुनाशूद्रेण वा पुनः द्विजः उपोष्य रजनीमेकां पंचगव्येन शुध्यति उच्छिष्टेन शूद्रेणोच्छिष्टः इत्यर्थः तथा तै स्पृष्ट
लाभ्यक्तस्त्वनाचांतः स्मश्रुकर्मणि मैथुने मूत्रोच्चारं यदा कुर्यादहोरात्रेण शुद्ध्यति उच्छिष्टस्य श्वकाकादिविष्ठास्पर्शे स्नानशुद्धिः प्रकरणे च शुद्धि

५२

प्रश्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः वष्टिपः वत्सः प्रश्रवणे मेध्याः शकुनिः फलपातने

रुक्तो चांडालादिस्पर्शे कृतस्नानस्य स्पर्शने दोषमाह यमः चांडालैः श्वपचैः स्पृष्टो निशि स्नानं समाचरेत् न वसेत्सदने रात्रौ सद्यः स्नानेन शुद्ध्यति
अथ तत्र वसेद्रात्राववस्नानाद्विचक्षणः न स्नानस्य तु तत्पापं शतधा परिवर्त्तते अथ स्वभावशुद्धिः तत्र मनुः नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसा
रितं ब्रह्मचारिगतं भैक्षं नित्यं मेध्यमिति स्थितिः नित्यं शुद्धोऽमेध्यानुपहतः प्रक्षालनव्यतिरेकेणैव स्वव्यवहारोचित इत्यर्थः कारुः शिल्पी पण्यं विक्र
य्यं क्रयदेशे प्रसारितं तच्च सिद्धान्नव्यतिरिक्तं विवक्षितं मनुर्विष्णुः नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने स्त्रियश्च रतिसंसर्गे श्वा मृगग्रहणे शु
चिः स्त्रीमुखमुच्छिष्टाद्यनुपहतं प्रश्रवे दोहानुकूलस्तनपाने फलपातने मुखेन दंतान्फलविभाजने स्त्रियश्च स्वभार्या एव मनुः श्वभिर्हतस्य
यन्मांसं शुचि तन्मनुरब्रवीत् क्रव्याद्भिश्च हतस्यान्यैश्चांडाद्यैश्च दस्युभिः मांसं शुचि भक्षणयैव यत्कल्पितं तदेव क्रव्याद्भिः व्याघ्रादिभिः यमः
बालकैर्यत्परिक्रान्तं स्त्रीभिराचरितं च यत् मशकैर्मक्षिकाभिश्च निलीनं नोपहन्यते निलीनमाक्रान्तं अदोषं सुमुखं स्त्रीणां गवां पृष्ठमजामुखं ए
तानि नित्यशुद्धानि यच्च वाचा प्रशस्यते आसनं शय्या यानं वस्त्रं मेध्यं बालमदूषितं ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः स्त्रीमुखं रतिसमयेषु
चि स्त्रीमुखं निधुवनश्चेति पैठीनसिवाक्यात् आसनं शयनं यानं स्त्रीमुखं कुतपं च यत् न दूषयंति विद्वांसो यज्ञेषु चमसांस्तथा कुतपो नेपाल
स्तत्रेणार्चितः कंबलः त्वरमितरव्याप्तमपि गौरश्वो विप्रुषश्छाया मक्षिकाः शलभाः शुकाः अजो हस्ती रथो ह्यत्रं रश्मयश्चेंदुसूर्ययोः शुचि
रग्नी रजो वायुरापो दधि धृतं पयः सर्वाण्येतानि शुद्धानि स्पर्शे मेध्यानि नित्यशः यस्मादेतानि शुद्धानि तस्मादशुचिस्पर्शेऽपि मेध्यानि छा

यातु चांडालाद्यस्पृश्यमेध्या तथाच ब्रह्मपुराणे चांडाल पतित छायास्पर्शे दुष्टा न तु भवेत् सुमंतुः घृतघटफलादीनाम भोज्यान्नानामदोषस्तथा भो
ज्यान्नानामपि घृतघटादयो न दुष्टा इत्यर्थः बौधायनः अदुष्टा संतता धारा वातोद्धूताश्च रेणवः आकराः शुचयः सर्वे वर्जयित्वा सुराकरं शातातपः
53 रेणवः शुचयः सर्वे वायुना समुदीरिताः अन्यत्र रासभाजाविश्वसंमूहनिवाससौ संमूहनिमार्जनी देवलः गोशकृत् क्षुद्रदेशास्थं श्मसानाद्दु
द्धृतं शिवं अग्राम्याम्भकन्देच्छुद्धा शुक्रविण्मूत्रवर्जिता गोमयं शुद्धदेशस्थं शुचिः श्मशानादुद्धृतं शुचिः तेन श्मशानस्थितं न शुद्धिः श्मशा
नस्थितं यावद्भवति तावदेवाशुचीत्यर्थः यमः पृष्ठतो गोगजस्कंधे सर्वतोश्वः शुचिस्तथा नद्यां मूत्रपुरीषेवाऽमेध्ये चमलमेवच गोः पुरीषं
च मूत्रं च नित्यं मेध्यमिति स्थितिः शंखः शुद्धं नदीगतं तोयं सर्व एव तथाकराः मुखवर्जं च गौः शुद्धा मार्जारः क्रमतो शुचिः देवलः अकश्मलै
समुद्धोग्निः दुर्मनुष्यैर दूषितः सर्वेषां मध्यप्रोक्तानां समर्थः शोधनायसः अकश्मलैः कश्मलेतरैः समद्धः प्रज्वलितः कश्मलं च देवलेन
परिभाषितं मानुषास्थिशवं मज्जा रेतो विण्मूत्रमेवच कुणपं प्यमेतच्च कश्मलं समुदाहृतं दुर्मनुष्यैश्चांडालाद्यैरभिर दूषितः दूषित
त्वं च स्पर्शन ग्रहणाभ्यां अग्नेर्वृषलभुक्तस्य ग्रहणं नास्त्यनायदि श्वपाको वृषलो भोक्तुं ब्राह्मणाग्निं च नार्हतः चांडालाग्नेरमेध्याग्नेः सू
तिकाग्नेश्च कर्हिचित् पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतं बृहस्पतिः पादशौचीब्राह्मणानामजाश्वानां मुखं शुचिः गवां पृष्ठानि शु ५२

छिद्राणि सर्वगात्राणि योषितां अश्वावडवा अश्वः सर्वत्र मेध्याः पूर्वमुक्तः याज्ञवल्क्यः नस्त्री दुष्यति जारेण नाग्निर्दहनकर्मणा नापो मूत्रपुरी
षाभ्यां न द्विजो वेदकर्मणा नस्त्रीत्यादेरर्थोऽग्रेऽव्यवस्थाप्यः नाप इति जलाशयास्थितानामपां दूषणाभावमाह जलाशयोपि कूपव्यतिरिक्तः
न द्विजो वेदकर्मणा ब्राह्मणेनेत्यर्थः मनुः ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युता
खानि मेध्यानि छिद्राणि स्पर्श्यानि अमेध्यान्यस्पर्श्यानि देहात् च्युता मलाः नखादयोऽमेध्या अस्पृश्या इत्यर्थः यमः दिवा सूर्यांशुभिस्त
प्तं रात्रौ नक्षत्रमारुतैः संध्ययोरप्युभाभ्यां च पवित्रं सर्वदा जलं व्यासः आच्छिन्नाग्रं च पद्मस्त्रं मरुत् प्रक्षालितं च यत् अहतं धातुरक्तं च तत्प
वित्रमिति स्थितिः अनुक्तं प्रोच्यते मनुः त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते अ
दृष्टमपवित्रं न यास्त्वयमज्ञातं निर्णिक्तं प्रक्षालितं ब्राह्मणानामिति चातुर्वर्ण्योपलक्षणं यमः बलात्कारोपभुक्ता च चोरहस्तगता
पि वा स्वयं विप्र निपन्ना वा ह्यथ वा विप्रमादिता अत्यंत दूषितापि स्त्री न परित्यागमर्हति सर्वेषां निःकृतिः प्रोक्ता नारीणां तु विशेषतः ए
तत्समानविषयेव नस्त्री दुष्यति जारेणेति वाक्ये निःकृतिः प्रायश्चित्तं प्रायश्चित्तमेव दर्शयति स्त्रियः पवित्रमतुलं नैता दुष्यंति कर्हिचित्
मासि मासि रजस्तासां दुष्कृतान्यपकर्षति सोमः शौचं ददौ तासां गंधर्वाश्च शुभां गिरं पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः याज्ञव
ल्क्यः व्यभिचाराहतौ शुद्धिः गर्भे त्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातके अस्यार्थः स्त्रीणां मनसो नो प्रवृत्ते सान्तःपूर्वकृताद्व

ट

गर्हिता

भिचाराच्छुद्धिर्भवति व्यभिचारेण यदि गर्भोत्पत्तिस्तदा तस्याः स्त्रीयस्त्यागो विधेयः गर्भवधे भर्तृवधे महापातके त्यागः तथा स्वच्छन्दगा

54 मिनी नारी तस्याः [illegible] स्त्यागो विधीयते न चैव स्त्रीवधं कुर्यान्न चैवाङ्गविकर्तनं वशिष्ठः चतुस्रस्तु परित्याज्याः शिष्यगा गुरुगा च पतिघ्नी या

च विशेषेण गर्हि[illegible]जोपगता वर्या [illegible]तः निंदितः स्मृत्यादि हारीतः गर्भघ्नी नधोवर्णगा शिष्यसुतगामिनी पापव्यसना सन्तांधनधान्य

क्षयकरी वर्ज्या ये च व्यभिचारिण्यः अधोवर्णोपकृष्टवर्णाः स्मृ. द्र. प्रो खलीखितो एकव्रतस्कन्नभावात्परोपरतत्वाच्च दुष्टाः कुलप्रांकर

कारिण्यो भवंति एकं व्रतस्कन्नभावादेकं व्रतं परिव्रतं ततः स्खलितत्वादित्यर्थः तथा च चांद्रायणं चतासां पावनमित्याचार्याः प्राजाप

त्यं वा तदिय मत्र व्यवस्था स्त्रीणां मदमोहबलात्कारादि प्रमादिजाते व्यभिचारे यावत् व[illegible]ल्कयं दावर्त्तनेन शुद्धिः कामकृते व्यभिचारे प्रां वाक्या

खलितेन वाक्यात्प्रायश्चित्तेन शुद्धिः गुरुशिष्यसुतादिगमनेऽन्यतो गर्भसंभवे गर्भपातने भर्तृवधे ब्रह्महत्यादिमहापातके च यथा

मवाक्यात्त्यागः यत्तु बलात्कारादि व्यभिचारेऽपि त्रिरात्रादि प्रायश्चित्तं स्मर्यते तद्जातरजस्कायाविषयं रजस्कायास्तु द्रष्टव्यं एवं च सति

पश्चाद्देशे व्यभिचारिणीनां ब्राह्मणीनां न प्रायश्चित्तमुपादिश्यते न वा कृतेऽपि प्रायश्चित्ते परिग्रहो इति प्रसंगभयेन क्रियत इति समाचार

स्तत्र तथैव व्यवहर्त्तव्यः यथाह मरीचिः येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः तत्र तं नावमन्येत धर्मस्तत्रैव तादृशः येषु देशे ५४

55

सुयेदेवा येषु देशेषु ये द्विजाः जेषु स्थानेषु यन्नोपयाचयत्रैव मानिका तत्र नान्या दर्शयानि इति शुद्धिविवेके त्रितीयपरिच्छेदः ३ शुद्धौ सप्तनिबंधा
न्दृष्टानुमतः पितुस्तथा भ्रातुः रुद्रधरेण कृतोयं शुद्धिविवेकः सतां प्रीत्यै १ सामान्यतोऽत्र वर्णानां शुद्धिर्मरणजन्मनोः प्रागथाशौचनियमास्त
तस्तेषां विशेषतः २ शुद्धकृत्कालतो शौचं संकरे शुद्धिरीरिता विदेशस्थार्भकस्त्रीणां मरणे गर्भसंश्रवे ३ शुद्धिर्म्रतु विशेषे च सा सापिंडे
निर्हरणादावथा शुद्धिरशुद्धिरहितास्तथा ४ अधिकारविवेकोत्रानधिकार निरूपणं जलाद्यनर्हकथनं पुत्राणां लक्षणं तथा ५ सपिंडानामिहत
तो लक्षणं परिकीर्त्तितं देहशुद्धिः क्षालनादि शुद्धिस्त्राप्यकीर्त्तिताः ६ स्नानशुद्धिस्तेजसादिद्रव्यशुद्धिरनंतरं पक्वान्नशुद्धिर्भूशुद्धिः शुद्धि
स्त्रोदकस्य च ७ ततो रजस्वलाशुद्धिस्ताच्छिष्टस्पर्शनेन च स्वभावशुद्धिश्चैतथा क्रमशोत्र प्रकीर्त्तिता ८ इति श्री महोपाध्याय श्रील
क्ष्मीधरात्मज महामहोपाध्याय श्री हलधरानुजः श्री रुद्रधरकृतिः शुद्धिविवेक संपूर्णम् शुभमस्तु संवत् १८६३ ज्येष्ठकृष्णतृतीया
यां चंद्रवासरे लिखितमिदं शिवचंद गुर्ज्जरेण विशालनगरे शुक्लाममध्ये अपराह्णे शुभमस्तु

५५

धा मिप्रारव